RNI No. : DELSAN/2011/38660    ISSN 2321 - 4937    DL(E)-20/5534/2024-26

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

卐 वर्षम्-१४ 卐 अंकः-१८ ( ३३० ) नवदेहली 卐 १६ मार्चमासः २०२५तः ३१ मार्चमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८

॥ ओ३म् ॥

दुर्जनः परिहर्तव्यो
विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न
भङ्करः॥

नीतिशतकम् 49

विप्राः मन्त्राः कुशा
वह्निस्तुलसी च खगेश्वर।
नैते निर्माल्यतां याति
क्रियामाणाः पुनः पुनः॥

गरुडपुराण (२/२१-२२)

॥ ओ३म् ॥

'सापेक्षं वीक्षितुं जाने न
दैवेनाप्यशक्यत॥'

(राजतरङ्गिणी,8/1031)

अर्थेष्वलभ्येष्वकृतप्रयत्नं
कृतादरं नित्यमुपायवत्सु।
जितेन्द्रियं नानुतपन्ति रोगास्-
तत्कालयुक्तं यदि नास्ति दैवम्॥

अष्टांग;संग्रह;सूत्र

## अस्माभिः स्वभाषायां लेखने बलं दातव्यं तदा एव क्षेत्रीयभाषासु अनुवादस्य प्रवृत्तिः वर्धिष्यते- प्रो. विरूपाक्षजड्डीपालः

### पाणिनिसंस्कृतविश्वविद्यालये पंचदिवसीयभारतीयभाषानुवाद कार्यशालायाः उद्घाटनम्

डॉ. दिनेश चौबे, उज्जयिनी

पञ्चदिवसात्मिकायाः भारतीयभाषानुवादकौशलसंवर्धन राष्ट्रियकार्यशालायाः शुभारम्भः मार्चमासस्य पञ्चतमे दिनाङ्के उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये भारतीयभाषासमित्याः उच्चशिक्षामन्त्रालयस्य भारतसर्वकारस्य एवञ्च श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य नवदेहली



इत्यस्य च संयुक्ताश्रयेण अभवत। मुख्यातिथिः, महर्षिसान्दिपनि राष्ट्रियवेदविद्याप्रतिष्ठानस्य सचिवः प्रो. विरूपाक्षजड्डीपालमहोदयः उक्तवान् यत् स्वभाषायां लेखनेन धर्मसंस्कृतिः इतिहास इत्यादीनां विषयानां संरक्षणं भवति अतः स्वभाषायां लेखने महत्त्वं दातव्यं तदा एव प्रादेशिकभाषासु अनुवादस्य प्रवृत्तिः वर्धिष्यते। भाषासमृद्ध्या सह अस्माकं साहित्यं व्यापकरूपेण अनूदितं पठनयोग्यः च भविष्यति। सारस्वतातिथिः विक्रमविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वप्रमुखः प्रो. केदारनारायणजोशीमहोदयः उक्तवान् यत् अनुवादेन अर्थसङ्कोचः अर्थविस्तारः अथ च अर्थादेशः च भवति। अतः अनुवादकाले विशेषं ध्यानं आवश्यकम् । अनुवादकः च अनेकभाषायाः ज्ञाता स्यात् संस्कृतसाहित्यं विश्वस्य समृद्धतमं साहित्यम् अस्ति।

सभायाः अध्यक्षः माननीयः कुलगुरुः प्रो.विजयकुमारसीजी महोदयः उक्तवान् यत् देशे उत्तमानुवादकानां महती आवश्यकता विद्यते। ये बहवः भाषाः जानन्ति तेषां कृते अनेके रोजगारस्य अवसराः उपलभ्यन्ते ये भाषाविषये, विषयविशेषज्ञाः सन्ति ते उत्तमाः अनुवादकाः भवितुमर्हन्ति । यस्मिन् संस्कृतज्ञानां कृते अनेकाः अवसराः सन्ति। प्रस्तावना अतिथिपरिचयः च : शिक्षाशास्त्र विभागस्य प्रमुखा कार्यशाला संयोजिका च डॉ. पूजा उपाध्यायः प्रस्तुतवती। धन्यवादज्ञापनं कुलसचिवः प्रो.दिलीपसोनीमहोदयः सञ्चालनञ्च विश्वामित्ररायः कृतवान्। कार्यक्रमे विभागाध्यक्षाः, प्राध्यापकाः, छात्राः, विभिन्नराज्येभ्यः समागताः प्रतिभागिनः च उपस्थिताः आसन्।

## संस्कृतं मानवजीवनस्य अभिन्नसम्बन्धं बोधयति-डॉ.रत्नेशवर्यः

वार्ताप्रेषकः – आचार्यदीनदयालशुक्लः

उत्तरप्रदेशसर्वकर्ष्यभाषाविभागः, उत्तरप्रदेशसंस्कृतसंस्थानः, लखनऊ तथा संस्कृतविभागः, ललितपुरस्यनेहरू




महाविद्यालयसमयुक्ताश्रयेन् एकदिवसीया संगोष्ठी आयोजिता। तस्याः विषयः 'संस्कृतसाहित्यस्य सांस्कृतिकसामाजिकयोगदानेन' संस्कृतभाषाविषये एकदिवसीयं राष्ट्रियसंगोष्ठीम् आयोजयित्वा,

शेषभागःतृतीयेपुटे

## देशस्य त्रयाणां केन्द्रीयसंस्कृतविश्वविद्यालयानां मध्ये अकादमिकसहमतिः

दिल्ली/तिरुपतिः (प्रो. अजयकुमारमिश्रः)

तिरुपतिस्थे राष्ट्रियसंस्कृतविश्वविद्यालये, केन्द्रीयसंस्कृतविश्वविद्यालये, दिल्ली तथा श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये, दिल्ली इत्येतयोः त्रयाणां विश्वविद्यालयानां मध्ये द्विदिवसीय चर्चायां निर्णयः कृतः यत् एते सर्वे विश्वविद्यालयाः मिलित्वा राष्ट्रियशिक्षानीतिंख्र2020 अनुसरन्तः संस्कृतसंवर्धनं



तथा तस्य नवाचारीप्रयोगं सार्थकं रूपेण क्रियान्वितुं प्रयतिष्यन्ते। अत्र निमित्तं एका अकादमिकसहमतिः अपि कृता अस्ति।

अस्मिन् अवसरः केन्द्रीयसंस्कृतविश्वविद्यालयस्य, दिल्ली कुलपतिः प्रो. श्रीनिवासवरखेड़ी इत्ययः अवदत् यत् एषा सहमतिः संस्कृतस्य वैश्विकउन्नयनाय अतीव महत्वपूर्णः भविष्यति। एते त्रयः केन्द्रीयसंस्कृतविश्वविद्यालयाः मिलित्वा स्नातक (शास्त्री) तथा स्नातकोत्तर (आचार्य) पाठ्यक्रमानां मानकीकरणं कर्तुं, भारतीयज्ञानपरम्परायाः संवर्धनाय च सम्मिल्य प्रयासं करिष्यन्ति। तदनुपरि शोधस्य निमित्तं अपि समाना नियमावली प्रवृत्ता भविष्यति।

शेषभागःसप्तमपुटे

## राजस्थानसंस्कृतअकादम्यां लिपिशिक्षणस्य शुभारम्भः



राजस्थानसंस्कृतअकादम्याः वैदिकहेरिटेजपाण्डुलिपिशोधनसंस्थाने गणगौरिबाजार-जयपुरे २१-दिवसीया लिपिशिक्षणकार्यशाला तथा पाण्डुलिपिप्रदर्शनस्य उद्घाटनकार्यक्रमः समायोजितः। अस्य कार्यक्रमस्य उद्घाटनं वियन्ना-ऑस्ट्रियादेशात् आगतः विश्वगुरुः महामण्डलेश्वरः परमहंसः स्वामीमहेश्वरानन्दपुरीजी महाराजेन तेषां करकमलेन सम्पन्नम्। तथैव जयपुरे सम्पन्नस्य अश्वमेधयज्ञस्य हस्तलिखितपाण्डुलिपेः विमोचनं महाराजश्रीस्य करकमलाभ्यां महामण्डलेश्वरस्वामिज्ञानेश्वरपुरीमहाराजः, डॉ. लताश्रीमालिः (निदेशिका राजस्थानसंस्कृतअकादमी), डॉ. रजनीशः हर्षः (सचिवः बालसाहित्यअकादमी), डॉ. सुरेन्द्रकुमारः शर्मा (समन्वयकः वैदिकहेरिटेजपाण्डुलिपिशोधनसंस्थानम्), प्रो. विजयपालः शास्त्री (पूर्वनिदेशकः केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली) इत्यादिभिः कृता। विश्वगुरुः महोदयः अवदत् यत् यूरोपखण्डस्य सप्तत्यधिकेषु देशेषु भारतीयज्ञानस्य प्रचारः कर्तव्यः, येन भारतम् पुनः विश्वगुरुरूपेण प्रतिष्ठां प्राप्स्यति।

अस्मिन कार्यक्रमे पाण्डुलिपिप्रदर्शनस्य अन्तर्गतं ज्योतिष, आयुर्वेद, रामचरितमानस, मोडीलिपिः, देवनागरी, गुरुमुखीलिपिषु लिखिताः गीता, दर्शनशास्त्रम्, वेदाः, तन्त्रशास्त्रम् इत्यादीनां महत्वपूर्णानां हस्तलिखितपाण्डुलिपीनां प्रदर्शनं कृतम्। समन्वयकः डॉ. सुरेन्द्रकुमारशर्मा अवदत् यत् ६ मार्चतः २६ मार्च २०२५ पर्यन्तं २१-दिवसीय लिपिशिक्षणकार्यशाला आयोज्यते, यस्मिन विभिन्नलिपिविशेषज्ञैः प्राचीनलिपीनां शिक्षणं प्रदास्यते। अस्य निमित्तं विभिन्नविद्यालय-महाविद्यालयेभ्यः चत्वारिंशदधिकाः छात्राः नामांकनं कृतवन्तः। अकादम्याः निदेशिका डॉ. लताश्रीमालिः अवदत् यत् अधुना संततिः संस्कारसंस्कृतिभ्यां दूरं गता अस्ति, तस्मिन् सन्दर्भे एतत् लिपिशिक्षणम् अतीव आवश्यकम्। अस्य माध्यमेन नवसंततिः भारतस्य प्राचीनज्ञानं ज्ञास्यति। अद्यतनकार्यक्रमस्य मुख्यवक्ता प्रो. विजयपालः शास्त्रीजी अवदत् यत् लिपिशिक्षणम् औषधिरूपेण संगृहीतव्यम्। एवं प्रकारस्य कार्यशालाः निरन्तरं आयोजनीया इत्यपि सः उक्तवान्। कार्यक्रमे अवतारपुरी, अवधेशवशिष्ठः, प्रीतिसाहूः, पंकजजैमिनिः, मनमोहनसेवार्थी, आशीषशर्मा, दुर्गेशशर्मा तथा विभिन्नविद्यालय-महाविद्यालयीयछात्राः, शिक्षकाः, अन्ये च गणमान्यजनाः उपस्थिताः। कार्यक्रमस्य संचालनं जयप्रकाशशर्मेण कृतम्।

# उत्तरप्रदेश-संस्कृत-संस्थाने प्रारब्धम् संस्कृतशिक्षकप्रशिक्षणम्

(वार्ताहरः- प्रवेशकुमारशुक्लः, लखनऊ)

!! वन्दे संस्कृत मातरम्!!

फाल्गुनशुक्लद्वितीयाशनिवासरतः फाल्गुनशुक्लैकादशीसोमवासरम्यावत् प्रचलिस्यति प्रशिक्षणमेतत्। अये! सुरभारतीसमुपासकाः हर्षोल्लासस्यविषयौयं यत्

उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितायाः गृहे गृहे संस्कृतमिति योजनायाः अन्तर्गते



दशदिवसीयावासीयसरलसंस्कृतभाषाशिक्षणप्रशिक्षणे प्रशिक्षणप्रशिक्षुणां कृते विविधोद्बोधनसत्रमायोज्यते । अस्मिन्नेवक्रमे गुरुवासरे आयोजितमुद्बोधनसत्रे प्रप्रथमं वाग्देवीं समर्च्य संस्थानगीतिका गीतवती आस्थाशुक्लामहोदया। आगतानामाताथिनां स्वागतं स्वागतभाषणेन सत्यम्-मिश्रमहोदयः कृतवान्। मुख्यातिथिरूपेणसमागताः केन्द्रीयसंस्कृतविश्वविद्यालयस्यानौपचारिकशिकणप्रमुखाः सन्ति ।

श्रीमान् सुधिष्ठकुमारमिश्रमहोदयाः उक्तं यत् प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते अतः अस्याः 'गृहे गृहे संस्कृतम्' इति योजनायाः अपि कानिचन् उद्देश्यानि सन्ति, मिश्रवर्याः संस्कृतभाषा एवं एतादृशी भाषा विद्यते यया सर्वस्याः समस्यायाः अपसारणं कर्तुं शक्नुमः 'क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे' महतोत्साहेन कार्याणि सम्पादनीयानि भवन्ति।

शिक्षणप्रशिक्षणञ्चौकाकला विद्यते । न केवलं प्राचीनकाले एवं संस्कृतं सर्वत्रासीत् साम्प्रतमपि सर्वत्र दृश्यते यतोहि 'संस्कृते सकलं ज्ञानं संस्कृते सकला कला' इति सर्वान् प्रशिक्षुकान् उद्बोधितवन्तः। श्रीमहेन्द्रमिश्रमहोदयः तकनीकीव्यवस्थानिर्हन्तः आसन् । संस्थानस्य निदेशकाः विनयश्रीवास्तवमहोदयाः प्रशिक्षणसमन्वयकाः धीरजमैठाणी, समन्वयकाः डा० अनिलगौतमवर्याः प्रशिक्षणसमन्वयिका राधाशर्मा, योजनाप्रभारी भगवानसिंहचौहानमहोदयः डा० जगदानन्दझा,दिव्यरञ्जनमहोदयाः प्रभृतयाः मान्याः उपस्तिताः आसन्।

सत्रसञ्चालनं कृतवत्यः निपुणसंचालिकाः कृतिकृष्णामहोदयाः। सर्वेषामागतानामतिथिनामधिकारीणाञ्च धन्यतावाकं श्रीराजनदूबेवर्याः प्रदत्तवन्तः। अन्तिमे शान्तिमत्रेण सत्रस्य समापनमभवत्।

# चित्रकूटधाम्नि सङ्घटनस्य विस्ताराय कार्यकर्तृणां नूतनगणः निर्मितः डॉ. रत्नेशत्रिवेदी

वार्ताहरः - आचार्यदीनदयालशुक्लः

संस्कृतवार्ता ।।चित्रकूटम्।। हर्षातिरेकोऽयं समाचारः यदद्य संस्कृतभारतीकानपुरप्रान्तस्य चित्रकूटविभागगोष्ठी तथा सङ्घटनस्य विस्तारदृष्ट्या नवीनकार्यकर्तृणां नूतनदायित्वस्य अपि घोषणा इति कार्यक्रमः साफल्येन सुसम्पन्नः।संस्कृतभारत्याः कर्णपुरप्रान्तस्य कार्यकर्तृभिः प्रान्तसमीक्षागोष्ठ्याः आयोजनं कृतम्। तत्र निखिलप्रान्तस्य कार्यविस्तारदृष्ट्या प्रत्येकं विभागे अखिभारतीयवरिष्ठकार्यकतृणां प्रवासः प्रचलिति । तद्धिया एव प्रान्तस्य चित्रकूटविभागे इयं गोष्ठी धार्मिकनगर्यां शिखरस्थकामतानाथस्वामिनः अनुकम्पया समायोजिता अभवत्। तत्र विभागस्य सर्वेऽपि दायित्ववन्तः




तथा नूतनाः कार्यकर्तारः समवेत्ता अभवन्। तत्र मुख्यतया संस्कृतभारत्याः अखिलभारतीयमहामंत्री श्रीमान् सत्यनारायणभट्टवर्यः तथा पूर्वोत्तरप्रदेशस्य क्षेत्रसंगठनमन्त्रि श्रीप्रमोदपण्डितवर्यौ च समुपस्थितौ। प्रान्तसहमन्त्रिः डॉ रत्नेश त्रिवेदी वर्याणां समुपस्थितौ विविधनूतनकार्यकर्तृभ्यः दायित्वं प्रदत्तम। तेषां विवरणम् अत्र प्रदीयते। चित्रकूटजनपदस्य कार्यतृणां दायित्वम् इत्थं वर्तते। श्रीमनोजकुमारद्विवेदी-विद्वत्परिषद् अध्यक्षः चित्रकूटविभागः., डॉ. विजय पयासी - कर्वीनगरसंयोजकः,श्रीसौरभअवस्थी - चित्रकूटधाम-संयोजकः, श्री महन्त रामदास जी चित्रकूटमन्दिरप्रमुखः, एवं श्री ब्रह्मदत्त द्विवेदी, भरतकूपनगर-संयोजकः तथा श्री देवानन्द दुबे चित्रकूटगुरुकुलप्रमुखः, बाँदाजनपदे मूलतः डॉ इच्छारामपाठकः बांदा-नगरसंयोजकः, तथा डॉ सर्वेश तिवारी, नरैनी-विकासखण्डसंयोजकत्वमिति दायित्वमङ्गीकृतवान्। एवमेव महोबाजनपदे अपि श्रीनीरजत्रिपाठी, महोबा-नगरसंयोजकः इति दायित्वमवाप्तवान्। आवर्षे क्रियमाणानां कार्याणां पूर्वयोजना विषये कार्यकतृभिः वैचारिकं चिन्तनं कृतम्। सङ्घटनस्य अखिलभारतीय महामन्त्री श्री सत्यनारायणभट्टवर्यः उक्तवान् यत् अस्मिन् सम्मेलने सम्पूर्णप्रान्ततः संस्कृतभारत्याः सर्वे अपि दायित्ववन्तः कार्यकर्तारः तथा सम्भाषणशीलाः जनाश्च सम्मिलिताश्च समागत्य आगामिनि कार्ययोजनाविषये विविधसत्रेषु परिचर्चितवन्तः। पूर्वोत्तरप्रदेश क्षेत्रसंगठनमन्त्रि श्री प्रमोदपण्डितवर्योऽवदत् यत् संस्कृतभारतीसङ्घटनं आविश्वे १९८१ तमवर्षात् निरन्तरं कार्यं कुर्वदस्ति। समग्रविभागे संस्कृतस्य प्रचारप्रसारे संस्कृतभारत्याः महत् योगदानं वर्तते। चित्रकूटधाम नगरं धार्मिकं नगरं वर्तते । भगवान श्रीरामः सीतालक्ष्मणाभ्यां सह अत्रैव द्वादशवर्षाणि यावत् निवासमकरोत्। गोष्ठ्यां संस्कृतभारत्याः तस्याः कार्याणां परिचयः, भविष्यस्य योजना इत्येतेषां कार्यक्रमाणाम् आयोजनं कृतम्। नूतनदायित्वस्य निर्वहणाय सहप्रान्तसङ्घटनमन्त्रित्वेन पूर्वतन चित्रकूटविभागसंयोजकः डॉ रत्नेश त्रिवेदीवर्योऽवदत् यत् अस्मिन् विभागे अपि नूतनदायित्वस्य प्राप्त्यानन्तरं सोत्साहं कार्यकर्तारः संस्कृतभारतीकार्येषु सहभागितां प्रकटयिष्यन्ति। अस्यां संगोष्ठ्यां बांदा, महोबा, तथा चित्रकूटजनपदस्थाः कार्यकर्तारः तथा प्रान्तस्य नैके दायित्ववन्तः कार्यकर्तारः समुपस्थिताः अभवन्।

# उज्जयिन्यां भारतीयभाषानुवादकौशल संवर्धनविषयाधारिता पञ्चदिवसीया राष्ट्रियकार्यशाला सम्पन्ना

डॉ.दिनेश चौबे, उज्जयिनी

भारतीयभाषासमितिः, उच्चशिक्षामन्त्रालयः, भारतसर्वकारः, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदिल्ली, तथा च शिक्षाशास्त्रविभागः, महर्षिपाणिनीसंस्कृतवैदिकविश्वविद्यालयः,



उज्जयिनी इत्येताषां संयुक्ताश्रयेन भारतीयभाषानुवादकौशल संवर्धन विषयाधारिता पञ्चदिवसीया राष्ट्रियकार्यशाला ०९ मार्च २०२५ तमे दिनाङ्के सम्पन्नतामगात्। मुख्यातिथिः तिरूपतिस्थ श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयस्य मान्यकुलपतिः प्रो.राणी सदाशिवमूर्तिवर्यः उक्तवान् यत् व्यावहारिकं साहित्यिकं सांस्कृतिकं च वातावरणं अवलोक्य अनुवादः करणीयः। तदतिरिक्तं रामायणादिग्रन्थानां निरन्तरं अध्ययनं करणीयं येन अनुवादस्य भावः स्वयमेव अवगम्यते। अनुवादः सर्वदा सत्यस्य अन्वेषणार्थं करणीयम्। सभायाः अध्यक्षः माननीयः कुलगुरुः प्रो.विजयकुमारसीजी महोदयेन उक्तं यत् अस्माकं कार्यशालायाः क्रमः सत्यस्य अन्वेषणात् सत्यस्य प्राप्तिपर्यन्तं आसीत्। सर्वासु भाषासु यत साहित्यं प्राप्यते तस्य सर्वस्य अनुवादः स्व भाषायां कर्तव्यः अनेन अस्माकम् उपभाषाणां संरक्षण प्रचार प्रसारोपि भवति।

अतिथिपरिचयः प्रतिवेदनं च शिक्षाशास्त्रविभागाध्यक्षा कार्यशालासमन्वयिका च डॉ. पूजा उपाध्यायमहोदया प्रस्तुतवती प्रतिवेदने उक्ता च यत् देशस्य विभिन्नसंस्थानां पञ्चाशताधिकाः प्रतिभागिनः कार्यशालायाम् अनुवादपद्धतिकौशलस्य प्रशिक्षणं प्राप्तवन्तः। अनेन भाषानुवादस्य प्रवर्धनं भविष्यति, अस्मिन् अवसरे हिन्दी-आङ्ग्ल-अनुवादेन सह प्रतिभागिभिः निर्मितं सुभाषितनिधि-नामकं पुस्तकमपि विमोचितम् । सत्रे कुलसचिवः प्रो.दिलीप सोनी, विभागसमन्वयकः डॉ. तुलसीदासपरोहा सहितेन विभिन्नराज्यस्य अध्यापकाः विभागाध्यक्षाः, प्राध्यापकाः, छात्राः एवं च प्रतिभागिनः उपस्थिताः आसन्। संचालनं डॉ. पूजा गौर आभार प्रदर्शनञ्च वेदांशुगौतमः कृतवान्।

प्रथमपुटस्य शेषभागः

## देशस्य त्रयाणां केन्द्रीयसंस्कृतविश्वविद्यालयानां...

उल्लेखनीयं यत् भारतसरकारस्य निर्देशस्य आलोकमध्ये एते विश्वविद्यालयाः प्रति वर्षं समागताः उत्कर्षमहोत्सवं आयोजयन्ति। अतः अस्मिन विषये अपि विविधाः निर्णयाः स्वीकृताः यथा विश्वविद्यालयानां कार्यसंपादनस्य सक्रियता तथा पारदर्शिता एकसूत्रे आबद्धा स्यात् उन्नयनं च प्राप्नुयात्। सूचनीयं यत् अस्यां द्विदिवसीय निर्णायकराष्ट्रियचर्चायां त्रयाणां विश्वविद्यालयानां कुलपतयः सहिताः अनेके अकादमिकप्रशासनिकाधिकारीगणः अपि उपस्थिताः आसन्। तथैव केन्द्रीयसंस्कृतविश्वविद्यालयस्य, दिल्ली अकादमिकाधिष्ठाता प्रो. मदनमोहनझा, कुलसचिवः प्रो. आर. जी. मुरलीकृष्णः तथा परीक्षानियन्त्रकः प्रो. पवनकुमारः अपि अत्र उपस्थिताः आसन्



# रामटेकनगरे पञ्चदिवसीय अनुवादकार्यशाला समारब्धा

रामटेकः।भारतीयभाषासमितिः (उच्चशिक्षामन्त्रालयः), भारतसर्वकारः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयस्य, नवदेलहि, कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालय रामटेक च, एतेषां संयुक्ततत्वावधाने पञ्चदिवसीयायाः अनुवादकार्यशालायाः उद्घाटनं अभवत। उद्घाटन कार्यक्रमे कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालय रामटेक परिसरस्य स्व. कमलाकर तोतडे सांस्कृतिकभवने आयोजनं कृतम्। कार्यक्रमस्य आध्यक्षं विश्वविद्यालयस्य कुलगुरु प्रो. हरेराम त्रिपाठी वर्येण कृतं आसीत्। विश्वविद्यालयस्य संस्थापक कुलपतिः डॉ. पंकज चण्डे मुख्यातिथिः आसीत् तथा च ओडिशा केन्द्रीयविश्वविद्यालयस्य भाषासंकायस्य डीनः एन.सी.पाण्डा सरस्वत अथितिरुपेण उपस्थितः असन्। तत्रैव



विशिष्टाथितिरूपेण श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयनवदेहल्याः कुलपतिः प्रो. मुरली मनोहर पाठक वर्येण ऑनलाइन माध्यमेन स्वीयां उपस्थितिं अकारयत। विशिष्टाथिति प्रो. मुरली मनोहर पाठकवर्येण उक्तं सर्वाषु भारतीय भाषाषु

पाठ्यक्रमः अध्ययन सामग्री संयोजयितुं विश्वविद्यालय अनुदान आयोगः अग्रसरः अस्ति।

अनुवादः नास्ति सरलः एतद् दुष्करः कार्यं वर्तते। एकस्यां भाषायां या सामग्री वर्तते तस्यैव सामग्र्याःअन्य भाषायां समानार्थ रूपेण समानभावरूपेण रूपान्तरणमेव अनुवादः अतः अस्यां अनुवाद कार्यशालायां अनुवादशैलीं प्रविधिं प्रकृयां अन्ये च महत्वपूर्ण विषयं अवलम्ब्यं अस्माभिः मार्गदर्शनं दीयते।

सारस्वत अथितिरुपेण एन सी पंडा महोदयेन् उक्तं संस्कृतभाषायां अत्यधिकमात्रायां हस्तलिखित पाण्डुलिपिनां उपस्थितः दृश्यते।एतेषां पाण्डुलिपिनां अन्याषु भाषाषु यदि अनुवादः कृयते चेत तर्हि अस्य सम्पूर्णेस्मिन् विश्वे प्रचारः प्रसारश्च भविष्यति।

रामायणस्य अनुवादः थाईभाषायां वेदोपनिषदां आंग्लभाषायां जर्मनभाषायां फ्रेन्चभाषायां अनुवादः बहुतरः दृश्यते अनेन एते ग्रन्थाः विदेशेपि दृश्यन्ते अनुवादमाध्यमेनैव एतेषां ग्रन्थानां प्रसारः सम्पूर्णेस्मिन विश्वे अभवत।

अनेनैव प्रकारेण ज्योतिषवास्तुशास्त्राधारित भारतीय ग्रन्थनामपि कनुवादः अपेक्षितः।

मुख्यातिथिरूपेण डॉ. पंकज चान्दे उक्तवन्तः - श्अनुवादः भाषायाः विषयवस्तुं तादृशं पक्षं ददाति यत् सा उड्डीय दूरं गन्तुं शक्नोति।श अनुवादेन एकस्य राज्यस्य परिचयः अन्यस्य देशस्य च परिचयः भवति। सम्प्रति कानून-चिकित्सा-प्रबन्धन-विषये अधिकान्शतः पुस्तकं आङ्ग्लभाषायां वर्तते इति डॉ. पंकज चान्दे अवदत् । एतेषां पुस्तकानां अनुवादस्य आवश्यकतां ते प्रकटितवन्तः।

कार्यक्रमस्य अध्यक्षरूपेण कुलगुरु प्रो. हरेराम त्रिपाठी-'भारतीयभाषासमित्याः उद्देश्यं देशे उत्तमानुवादकानाम् अभावं पूरयितुं वर्तते। देशे अनेकानि महत्त्वपूर्णानि अनुवादग्रन्थानि अवशिष्टानि सन्ति। अनुमानानुसारं न्यायालयेषु ११ कोटिभ्यः अधिकाः निर्णयाः कृताः सन्ति। एतेषां २२ भारतीयभाषासु अनुवादस्य योजना अस्ति। अतः कोटिकोटि अनुवादकानां आवश्यकता भविष्यति। अनेन लक्षशः जनानां रोजगारः अपि प्राप्स्यति। कुलपतिः अवदत, श्गूगल (यन्त्रस्य) आवश्यकं ज्ञानं नास्ति।श अतः भाषासु निपुणः विषयविशेषज्ञः एव उत्तमः अनुवादकः भवितुम् अर्हति।

कार्यक्रमस्य परिचयः शिक्षाविभागस्य प्रमुखः हृषिकेशदलाईः प्रकटितवन्तः। मन्चसंचालन प्रा. श्रीवर्दा मलागे तथा धन्यवाद ज्ञापनं सीडीओई निदेशकः एवं कार्यशालायाः संयोजक डॉ. अनिल कुमार दुबे महोदयेन् कृतं। कार्यक्रमे विश्वविद्यालयस्य डीन, विभागाध्यक्षाः, प्राध्यापकाः, अधिकारी, कर्मचारी, छात्राः च बहुसंख्येन उपस्थिताः आसन्।

विदेशीयविशेषज्ञस्य मार्गदर्शनम् अपि

कार्यशालायाः प्रथमदिने अन्ये त्रयः सत्राः अपि अभवन्। तेषु नेपालसंस्कृतविश्वविद्यालयस्य प्रा. काशीनाथ न्योपानेन् शास्त्रीय अनुवाद परम्परा इति विषयोपरि विशेष व्याख्यानं दत्तवन्तः। तथैव संस्कृतसाहित्यादिभाषाविभागस्य प्रभारी डीनः प्रो. पराग जोशी वर्याः अनुवादस्य इतिहासः इति विषयोपरि विषेश व्याख्यानं दत्तवन्तः। एवं प्रो.नन्दपुरी महोदयाः साहित्यग्रन्थानां अनुवादविषये मार्गदर्शनं कृतवती।

---

प्रथमपुटस्य शेषभागः **संस्कृतं मानवजीवनस्य अभिन्नसम्बन्धं....**

उपर्युक्तावश्यकतानुसारं, युवानां एव आवश्यकतानुसारं, वेदसाहित्ये लिखितम् । अस्माभिः उपनिषद् इति दर्शनम्। शास्त्रं, पुराणं, महाकाव्यं रामायणं, महाभारतं, आयुर्वेदः, ध्वनिशास्त्रं, भूविज्ञानं, धर्मशास्त्रं, नीतिशास्त्रं, काव्यीनां परिचयं करणीयमेव। संगोष्ठ्याः उद्घाटनं महाविद्यालयस्य प्रबन्धकः प्रदीपचौबे मातुः सरस्वत्याः आराधना एवं आगंतुक विदुषां सम्मानेनाकरोत्। कार्यक्रमे मुख्यातिथिरूपेण श्रीहरगोविन्दकुशवाहा अखिलभारतीयः उपाध्यक्षः बौद्धसंस्थानं समुपस्थिताः आसन्।

अस्याः गोष्ठ्याः समन्वयकत्वेन उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रतिनिधिभूतत्वेन संस्थानस्य पूर्वसदस्यः तथा श्रीवामदेवसंस्कृतमहाविद्यालयबांदाजनपदस्य सहायकव्याकरणविभागाध्यक्षः तथा संस्कृतभारतीकानपुरप्रान्तस्य सहप्रान्तसङ्घटनमन्त्रित्वेन सुरभारतीसमाराधकाः डॉ.रत्नेशत्रिवेदीवर्यः समागतः। अस्याः संगोष्ठ्याः अध्यक्षतां महाविद्यालयस्य प्राचार्यः कृतवान्। प्रो. वैदिक विश्वविद्यालयस्य सहायक प्राध्यापकः करौंदी कटनी इत्यादयः दयानन्द वैदिकमहाविद्यालयेन, सहायकप्रोफेसररूपेण दत्ताः महत्त्वपूर्णाः वक्तव्याः : विभिन्नविषयेषु संगोष्ठीः, प्राध्यापकाः, शोधसहकारिणः, सहभागिनः, डॉ. दीपकपाठकः, प्रधानाध्यापकेन अध्यक्षीयभाषणेन सह कृतम्। प्रो डॉ. ओमप्रकाशशास्त्रिणा सर्वेषां कृते आभारं प्रकटितवान्। गोष्ठ्याम् अस्याम् महाविद्यालयस्य विविधविभागीयाः अध्यक्षा-महाविद्यालयस्य सर्वे सहायकाध्यापकाः छात्राः अन्ये अध्यापकाः अध्यापिकाः चोपस्थिता आसन् । महाद्यालये एतादृशः संस्कृतकार्यक्रमं दृष्ट्वा सर्वे नन्दिताः आनन्दिताश्चासन्।

# कालिदासस्य काव्येषु राष्ट्रियता एवं सामाजिकसमरसता इत्यस्मिन् विषये एकदिवसीया सङ्गोष्ठी

वार्ताप्रेषकः - आचार्यदीनदयालशुक्लः

उत्तरप्रदेशस्य फतेहपुरजनपदस्थ छिवलहास्थाने सदानन्दमहाविद्यालयस्य संस्कृतविभागे अन्ताराष्ट्रिय-महिला-दिवसावसरे उत्तरप्रदेशसंस्कृतसंस्थानम् लखनऊ परतया आयोजिता 'कालिदासस्य काव्येषु राष्ट्रियता एवं सामाजिकसमरसता' इत्यस्मिन् विषये एकदिवसीया सङ्गोष्ठी अद्य सफलतया सम्पन्ना। कार्यक्रमे मुख्यातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीगङ्गानाथझापरिसरस्य वेदविभागाध्यक्षाः



प्रो.मनोजकुमारमिश्रवर्यः समुपस्थिताः आसन्।

स्वभाषणे परिवारव्यवस्थापनस्य विषये बलं दत्त्वा सः अवदत् यत् परिवारव्यवस्थापनं प्रति ध्यानं दत्त्वा एव राष्ट्रस्य केन्द्रबिन्दुः अस्माकं मनसि हृदये च सर्वदा तिष्ठति। भवन्तः स्वसन्ततिनां चरित्रस्य नैतिकविकासस्य च विषये सर्वदा गम्भीराः भवेयुः। अस्माकं बालकाः सुनागरिकाः भूत्वा पूर्णसमर्पणेन राष्ट्रनिर्माणं प्रति स्वकर्तव्यं निर्वहन्तु। अस्माभिः सर्वैः मिलित्वा नागरिकदायित्वं निर्वहणीयम्। भारतीयत्वं अस्माकं तादात्म्यम्, राष्ट्रं सर्वोच्चम्, एतदर्थं प्रत्येकं नागरिकं स्वनागरिककर्तव्यं निर्वहन् आत्मत्यागं कर्तुं प्रवृत्तः भविष्यति। नारीसशक्तिकरणस्य उल्लेखं कुर्वन् महाकविकालिदासस्य कृतयः महिलासशक्तिकरणस्य महत्त्वपूर्णं उदाहरणं इति उक्तवान्। तस्य अभिज्ञानशकुन्तलम् इति ग्रन्थः सन्दर्भरूपेण द्रष्टुं शक्यते। महाविद्यालयस्यास्य प्रबन्धकवर्यः श्रीप्रकाशत्रिपाठी कार्यक्रमे समुपस्थितः। अस्याः गोष्ठ्याः समन्वयकत्वेन उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रतिनिधिभूतत्वेन संस्थानस्य पूर्वसदस्यः तथा श्रीवामदेवसंस्कृतमहाविद्यालयबांदाजनपदस्य सहायकव्याकरणविभागाध्यक्षः तथा संस्कृतभारतीकानपुरप्रान्तस्य सहप्रान्तसङ्घटनमन्त्रित्वेन सुरभारतीसमाराधकाः डॉ.रत्नेशत्रिवेदीवर्यः समागतः। सोऽवदत् यत् महाकविकालिदासस्य कृतीषु वयं मनुष्यस्य प्रकृतेः च अद्भुतं अखण्डं च सम्बन्धं द्रष्टुं शक्नुमः। महाकविः कालिदासः स्वकृतेषु पर्यावरणसंरक्षणस्य सन्देशं दत्तवान् यः सर्वदा प्रासंगिकः अस्ति। मेघदूतम इत्यादिना तस्य कालातीतकृतीनां प्रेरणाम् आदाय अस्माभिः अस्माकं पृथिवी उद्धारितव्या। पर्यावरणसंरक्षणं जलवायुसंरक्षणं च प्रति गम्भीरप्रयत्नाः करणीयाः भविष्यन्ति, यतः अन्यः पृथिवी जीवितुं उपलब्धा नास्ति। सारस्वतातिथित्वेन उत्तरप्रदेशसंस्कृतसंस्थानस्य भाषाप्रशिक्षकः श्रीमान् ओमदत्तद्विवेदीमहाशयः तत्र समुपस्थितः। अस्याः सङ्गोष्ठ्याः संयोजकः तथा सञ्चालकत्वेन आसीत् महाविद्यालयस्य सहायकाध्यापकः डॉ.यीशनारायणद्विवेदिमहोदयः। निर्णायकत्वेन महाविद्यालयस्य प्राचार्यः प्रो. भानूशङ्करमहोदयः अन्ताराष्ट्रियमहिलादिवसस्य शुभकामनां प्रदाय समेषामपि समागतवतामतिथीनां पुष्पगुच्छैः अङ्गवस्त्रेण च स्वागतं विहितम्। गोष्ठ्याम् अस्याम् महाविद्यालयस्य विविधविभागीयाः अध्यक्षा-महाविद्यालयस्य सर्वे सहायकाध्यापकाः छात्राः अन्ये अध्यापकाः अध्यापिकाः चोपस्थिता आसन्। महाद्यालये एतादृशः संस्कृतकार्यक्रमः आयोजितः इति कारणेन सर्वे आनन्दिताः प्रफुल्लिताश्चासन।

---

# 'योगक्षेमाय -संस्कृतम्' इति विषयाधारिता एकदिवसीयाराष्ट्रियशोधगोष्ठ्याः समापनम्

डॉ.दिनेश चौबे, उज्जयिनी

उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिक विश्वविद्यालयस्य, संस्कृतशिक्षणप्रशिक्षणज्ञानविज्ञानप्रवर्धनकेन्द्रेण, नवदेहलीस्थ केन्द्रीयसंस्कृतविश्वविद्यालयस्य आर्थिकानुदानेन 'योगक्षेमाय-संस्कृतम्' इति विषयमाश्रित्य एकदिवसीया राष्ट्रियशोधसङ्गोष्ठी ७ मार्च २०२५ तमे दिनाङ्के उज्जयिन्याम् आयोजिता आसीत् । कार्यशालायाः उद्घाटनसत्रे मुख्यातिथिः कालिदाससंस्कृत- अकादमी, निदेशकः डॉ. गोविन्दगन्धेवर्यः उक्तवान् यत् सम्प्रति अस्माभिः



शास्त्रशिक्षायाः अनुसरणम् अनिवार्यरूपेण करणीयम्, यत्किमपि ज्ञानं कल्याणार्थं भवितुमर्हति तत् अर्जनीयम् अस्माकं ज्ञानं वर्धयितुं संस्कृतस्य प्रचारस्य भावनायाः सह संस्कृतस्य अध्ययनं कर्तव्यम्, तदा एव भारतं विश्वगुरुः भवितुं शक्यते कार्यशालायाः अध्यक्षतां कुर्वन्तः माननीयः कुलगुरुः आचार्यः विजयकुमारसीजीमहोदय अवदत् यत् अस्माकं ज्ञानस्य निधिं संरक्षितुं प्रयासो विधेयः संस्कृतं विना देशस्य कल्याणं न सम्भवति।संस्कृतम् एव मनुष्यस्य कल्याणं सुनिश्चितं कर्तुं समर्थम् अस्ति। महाराष्ट्रस्य वर्धायां स्थित् महात्मागान्धी अन्ताराष्ट्रिय हिन्दीविश्वविद्यालयस्य संस्कृतविभागस्य सहायकप्राध्यापकः डॉ. जगदीशनारायणतिवारी स्ववक्तव्ये उक्तवान् यत् संस्कृतं देवानां भाषा अस्ति तथा च संस्कृतस्य अध्ययनेन वयं सर्वविधज्ञानस्य परम्पराणां च विषये विज्ञाः भवामः। संस्कृतसाहित्ये उपलभ्यमानाः ग्रन्थाः अस्माकं मोक्षस्यमार्गः प्रशस्ती कुर्वन्ति। समापनसत्रे सारस्वतातिथिः प्रो.केदारनारायणजोशी विक्रमविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागप्रमुखः उक्तवान् यत् अप्राप्तवस्तूनाम् प्राप्तिः 'योगः', प्राप्तसामग्रीणां रक्षणं च 'क्षेम' इति। यत् संस्कृतस्य अध्ययनेन एव सम्भवति। यथार्थतः संस्कृते बद्धाः वेदाः एव अप्राप्यप्राप्त्यर्थं समर्थाः भवन्ति । अतिथिपरिचयः भूमिका च केन्द्रप्रभारी संगोष्ठीसंयोजकः च डॉ. अखिलेशकुमारद्विवेदीमहोदयः प्रस्तुतवान् । संचालनं सहसंयोजकः डॉ. दिनेशचौबेवर्यः अनुरुद्धकुमारत्रिपाठी च कृतवन्तौ। धन्यवादज्ञापनं कुलसचिवः प्रो. दिलीपसोनी विभागसंयोजकः डॉ. तुलसीदास परोहा च उक्तवन्तौ। संगोष्ठ्याः चतुर्षु सत्रेषु शताधिकानि शोधपत्राणि पठितानि।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

सादरं नमोनमः।

होली भारतस्य एकः विशिष्टः सांस्कृतिकः आध्यात्मिकश्च महोत्सवः। अध्यात्मं नाम मनुष्यस्य ईश्वरेण संबंद्धता अथ च स्वस्यैव स्वेन सह संबद्धता। अतः एव होली मानवस्य परमात्मना सह अथवा स्वेन सह साक्षात्कारो होली। वर्णाः न केवलं प्रकृतौ चित्रेषु चौव न भवन्ति अपितु अस्माकम् आंतरिक्याम् ऊर्जायामपि भवन्ति, यद्धि अस्माभिः आभामंडलं कथ्यतेस अस्मज्जीवने वर्णानां गहनः प्रभावः भवति , वयं चिन्तनमपि वर्णानां सहयोगेनैव कुर्म । गतिरपि वर्णानां सहयोगेनैव। आभामंडलं, यत् सर्वाधिकं शक्तिशालि भवति तदपि वर्णानामेव अनुकृतिः। होली महोत्सवस्य अवसरः अध्यात्मना सम्बद्धजनेभ्यः आधिक्येन उपयोगी महत्वपूर्णश्च, यतः अध्यात्मनो योगस्य च विशेषज्ञाः विभिन्नवर्णान् ध्यात्वा साधनायां तान् उपयुज्य आभामंडलं सशक्तीकुर्वन्ति। अनेन प्रकारेण होली आमोद-प्रमोदस्यैव न अपितु अध्यात्मनोऽनुपमं पर्व ।

होली महोत्सवः तेन च संबद्ध बसंत ऋतुः उभावपि पुरुषार्थस्य प्रतीकौ। पादपाः अपि अस्मिन् ऋतौ नूतन परिधानं धरन्ति। बसंतः नाम नूतनः । नूतनः उत्साहः, नूतना आशा, नूतनोल्लासः नूतना प्रेरणा- एते बसंतर्तो: महत्वपूर्णानि अवदानानि।

होली आध्यात्मिक वर्णे: क्रीडितुम् एक पूर्ण प्रक्रिया आचार्येण महाप्रज्ञेन प्रणितायां प्रेक्षाध्यान पद्धतौ उपलब्धा । अस्य प्रेक्षाध्यानस्य अंतर्गतं लेश्या ध्यानं कार्यते, यत् वर्णानां ध्यानं विद्यते।

लेश्या ध्यानं नाम वर्णानां ध्यानम्। अत्र वयं निश्चित वर्णान् निश्चित्य चैतन्य-केंद्रे द्रष्टुं प्रयत्नं कुर्मः। वर्णानां साक्षात्काराय विविध वर्णानां ज्ञानम् आवश्यकम्। वर्णानां भेदद्वयम् । प्रथमः प्रकाशमानः नाम (Bright) प्रकाशस्य वर्णः द्वितीयः अंधे (Dull) अंधकारस्य वर्णः। अंधकारस्य कृष्णः, नीलः कापोतः च वर्णः अप्रशस्तः। किंतु प्रकाशस्य कृष्णः, नीलः कापोतश्च वर्णः नैव अप्रशस्तः। इत्यमेव अंधकारस्य रक्तः, पीतः श्वेतश्च वर्णः प्रशस्तो न प्रकाशस्य तु रक्तः, पीतः श्वेतश्च वर्णः प्रशस्तः। ध्याने यान् वर्णान् वयं पश्यैम ते प्रकाशयुक्ताः स्युः न तु अंधकारेण युक्ताः । आचार्यश्री: महाप्रज्ञ: एतदेव अधिकं स्पष्टं कुर्वन् ब्रूते यत् यदा व्यक्तेः चरित्रं शुद्ध्यति तदा तत् संकल्पः स्वयमेव फलति चरित्र शुद्धेः आधारेण संकल्प क्षमता जागर्ति। यस्य संकल्प-बलं जागर्ति तस्य काचिदपि कामना अपूर्णा न तिष्ठति । संकल्पः लेश्याः प्रभावयति लेश्या इत्यस्य बृहत् सूत्रम् अस्ति चरित्रम्। तेजोलेश्या, पद्मलेश्या शुक्ललेश्या इत्येता तिस्रः उज्ज्वल लेश्याः। एतासां वर्णः प्रकाशयुक्तः। कृष्णलेश्या, नीललेश्या कापोतलेश्या इत्येता: तिस्रोऽशुद्धलेश्याः। अंधकारेण युक्ताः वर्णाः भवन्ति। एताः विकृतं भावं जनयन्ति पैदा करते हैं। इमे वर्णाः अस्मद्आभामंडलं धूमिलं कुर्वन्ति । आभया प्रकाशेन वा युक्तवर्णाः आभामंडले निर्मलताम् उज्ज्वलतां च आनयन्ति। इमे आभामंडलस्य क्षमतां वर्धयन्ति। तदीयाः विद्युत-चुंबकीय रश्मयः अत्यन्तं शक्तिशालिनः भवन्ति।

होली-अवसरे आध्यात्मिकवर्णै: सह होलीं समाचरितुं प्रेक्षाध्यानस्य प्रक्रिया निश्चितमेव सुखद: एवं च एकः अलौकिकः अनुभवः वर्तते । वर्णाः लोकजीवने एव न अपितु शारीरिकदृष्ट्या, मानसिकदृष्ट्या आध्यात्मिकदृष्ट्या च अत्यन्तं महत्वं भजन्ते।

भवदीया

सम्पादिका

॥ वेद वाणी ॥

'मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ॥
उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ॥

May the priests who perform, on my behalf, rituals relating to the sacrificial fire, offer oblations and prayers to Gods. May the purpose and prayer of my mind be sincere and true. May I not slip into any kind of sin. O ! Gods of Universe! Bless us.""May the omnipresent and most revered Lord Indra, who is worthy of being invoked by many performers of holy rituals, be present at our sacrificial fire and bestow joy upon us. May Lord Indra who is the master of green horses that draw His chariot, be gracious and kind to our children and grand-children . May He never harm us.May He never disown us.'

The Rig Veda 10.18.4&8

**संकलन : एस.वासुदेव रावः**

# संस्कृतस्य महामनीषिणां पूर्वकुलपति-महामहोपाध्याय-प्रो. भवेन्द्रझामहाभागानां महाप्रयाणम्

देहली(सन्नीकुमारः)। विक्रमाब्दे२०८१ फाल्गुन पूर्णिमायां मीनसंक्रान्तौ तदनुसारं १४ मार्च २०२५ तमे दिनांके सायंकाले नववादने नवदेहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य पूर्ववेदवेदाङ्गसंकायाध्यक्षः, पूर्वकुलपतिः वेदादिशास्त्राणां परममनीषी भगवती श्रीदुर्गापरमेश्वर्याः कृपापात्रः सद्गृहस्थः महामहोपाध्यायः प्रो.भवेन्द्रझा स्वकीय चरमावस्थायां भगवतः श्रीशालग्रामस्य भगवत्याः श्रीतुलसीमातुः सानिध्ये राम-रामेति समुच्चरन् परब्रह्मणि विलीनः। पूज्यानां श्रीभवेन्द्रझागुरुवर्याणां और्ध्वदैहिक-अन्त्येष्टिकर्म १५ मार्च २०२५तमे दिनांके रविवासरे हरिद्वारे यथाविधिः विहितः। प्रो.भवेन्द्रझावर्याणां धर्मपत्नी श्रीमती रीताझा अत्यन्तं विह्वलतया शोकासक्तासीत। तेषां पुत्री पुत्रवधूपौत्रादयः सर्वे अपि कुटुम्बजनाः अत्यन्तं दुःखसंप्ताः आसन। ज्येष्ठपुत्रः श्रीसंजयकुमारझा स्वपितुः पार्थिवदेहं हरिद्वारं नीत्वा गंगातटे मुखाग्निं दत्तवान। ततः परम् और्ध्वदैहिकसंस्कारः तेषां निवासस्थाने संस्कृतनगरे रोहिण्यां नवदेहल्यामभवत्।



**परिवर्तिनि संसारे मृतः को वा न जायते।**
**स जातो येन जातेन याति वंशः समुन्नतिम्॥**

परिवर्तनशीलेऽस्मिन् संसारे प्राणिनः उत्पद्यन्ते विलीयन्ते च । वस्तुतः तस्य एव जन्म सार्थकं भवति यस्य जन्मात् वंशः उन्नतिं याति। कविकुल-कैरवकलाप-कलाधरः पूज्यपाद: श्रीगोस्वामी वदति-

**कीरति भानिति भूति भलि सोई।**
**सुरसरि सम सब कहं हित होई॥**

पूज्यानां गुरुवर्याणां श्रीचरणेषु साश्रुश्रद्धाञ्जलिं समर्पयामि तथा अखण्डचन्द्रखण्डधारी मुण्डमालभूषितदेवाधिदेवं आशुतोषं भूतनाथं भगवान् श्रीमहाकालेश्वरं प्रार्थयामि यत् दिव्यात्मानं शिवसायुज्यं प्रयच्छेत। परिजनान् दुःखं सोढुं शक्तिं दद्यात्।

हा हा दैवं स्फुटति हृदयं ध्वंसते देहबन्धः। संस्कृतजगतः मूर्धन्यैः विद्वांसैः ब्रह्मलीन-प्रो.भवेन्द्रझामहोदयानां विषये उद्गाराः व्यक्ताः -ओह सम्पूर्णधरायाः दुर्दैवं जातं यत् यथावस्थितः अप्रतिमसारल्यादिसमस्तविप्रलक्षणभूषितः परमनिश्छलः पण्डितप्रकाण्डः परमोपासकः निर्मलप्रकृतिः सदैव ब्रह्मभावे प्रतिष्ठितः स्वनियतस्वभावे विहरणशीलः अद्भुतः अन्वर्थब्राह्मणः अस्य लोकस्य परित्यागं कृत्वा पराम्बाधामगमनं कृतवान्, यस्योपरि कदापि बाह्ममायाकृतकापट्यपूर्णसंसारस्य प्रभावः नासीत्। यथा सूर्यस्य समक्षं अन्धकारं नैव तिष्ठति तथैव कृत्रिमाः शब्दचातुर्ययुक्ताः जनां तेषां समक्षे नैव तिष्ठन्ति स्म। येषां वाण्यां व्यवहारे च पारदर्शिता एकरूपता चासीत। स्वभावतः तेषां निर्मला प्रकृतिरासीत्। तेषां गमनं न केवलं पाण्डित्यपरम्परायाः क्षतिः अपितु तेषां महाप्रयाणेन अस्माकं निश्छलतापूर्णं साधुतापूर्णं विप्रत्वस्य अनुपमं निदर्शनं नष्टम्। ते सर्वलोकशरण्यपराम्बायाः अभयदायी उत्सङ्गः प्राप्नुयुः। **(प्रो.जयकान्तशर्मा, नवदेहली)**

महामहोपाध्यायः प्रो.भवेन्द्रझा निश्चित् रूपेण भाषाविद् आसीत्। तेषां व्यक्तित्वं कृतित्वं च समाजे चिरकालं यावत् स्थास्यति। स अद्य मानवताया मूलादर्शान् सिद्धान्तान् आचारान् विचारान् हृदये निधाय संसारक्रमाद् विमुक्तः। यद्यपि धर्मपरायणे देशेऽस्मिन् एतादृशानां महामानवनामावश्यकता विद्यते तथापि मृत्युः परं सत्यमस्ति। प्रो.भवेन्द्रझामहोदयान् साश्रुश्रद्धाञ्जलिं समर्पयामि।(प्रो. केशवरामशर्मा, हिमाचलप्रदेशः) नितान्तं दुःखप्रदः समाचारः अस्ति यत् सत्कुलप्रसूतः महावैयाकरणः भगवदुपासकः आचार्यवर्यः प्रो.भवेन्द्रझामहोदयः दिवङ्गतः। तेषां प्रेमपूर्णाचरणं अदुष्यवैदुष्यं वारं वारं स्मर्यते। भगवत्या पराम्बाश्रीकालीमात्रा विनतिं करोमि यत् तेषां कृते स्वचरणेषु स्थानं दद्यात। विनम्रप्रणिपातपुरःसरं श्रद्धाञ्जलिं समर्पयामि।

**(प्रो.रवीन्द्रनाथः भट्टाचार्यः, कोलकाता।)**

आदरणीयाः प्रोभवेन्द्रझा निष्ठावन्तः मनीषिणः आसन् । शास्त्राध्ययनाध्यापने तेषां मूर्धन्यस्थानमासीत। तेषां गमनं सभ्यसमाजस्य अपूरणीया क्षतिरस्ति। पराम्बा भगवती तान् स्वचरणकमलेषु स्थानं दद्यादिति प्रार्थयामि।

**(प्रो.रामसलाही द्विवेदी, नवदेहली)**

आदरणीयाः प्रो.भवेन्द्रझागुरवः विद्वतायाः सरलतायाश्च प्रतिमूर्तयः आसन। तेषा महाप्रयाणं विद्वत्जगतः अपूरणीया क्षतिः वर्तते। दिवङ्गतात्मा शान्ति प्राप्नुयादिति। **(प्रो.अनेकान्तजैन. नवदेहली)**

देशस्य गौरवाः सद्गृहस्थाः विश्वविश्रुताः मनीषिणः नैकानां महारुद्रयज्ञानां शतचण्डीमहायज्ञानां सहस्रचण्डीमहायज्ञादिनां सोत्साहं सविधिः अनष्ठानकर्तारः प्रो.भवेन्द्रझामहाभागाः परब्रह्मणि विलीनाः इति श्रुत्वा अत्यधिकं दुःखं सञ्जातम्। ते भगवत्याः श्रीदुर्गापरमेश्वर्याः परमोपासकाः आसन्। तीर्थराज-प्रयागे तैः सह श्रीमद्भागवतमहापुराणस्य श्रवणस्यावसरः लब्धः।

**(श्रीज्ञानेन्द्रप्रसादमिश्रः, अधिवक्ता, उज्जैन)**

राष्ट्रपतिना सम्मानिताः प्रो.भवेन्द्रझावर्याः शक्तेः समुपासकाः आसन्। ते प्रत्यहं दुर्गासप्तशतेः पाठं कुर्वन्ति स्म। अत्यन्तं मृदुभाषिणः आसन्। भगवदनुकम्पया ते हरिद्वारे प्रयागराजे उज्जयिन्यां तीर्थेषु ते अस्माकं निवासस्थाने अत्यन्तं आत्मीयाभिभावकरूपेण तिष्ठन्ति स्म। आदरणीयानां प्रो.भवेन्द्रझावर्याणां गमनं मदीयव्यक्तिगतक्षतिरस्ति।

**(श्रीराजेन्द्रप्रसादमिश्रः, व्यवस्थापकः, लल्लू जी एण्ड सन्स, प्रयागराजः)**

राष्ट्रपतिसम्मानेन सम्मानिताः पूर्वकुलपतयः वेदवेदाङ्गपीठाध्यक्षचराः, परमादरणीयाः प्रो.भवेन्द्रझावर्याः भगवतः धामं प्रस्थितवन्तः इति मनः नैव विश्वसीति। तेषां कर्तव्यपरायणता सर्वैः सह सरलभावेन व्यवहारः, स्वविषयोपस्थापने पाण्डित्यमित्यादि वैशिष्ट्यमासीत। ईश्वरः तेषामात्मानं शान्तिं प्रयच्छेत्। स्नेहीनां कृते कुटुम्बजनानां कृते असह्यकष्टं सोढुं सामर्थ्यं च दद्यात्।

**(प्रो.देवीप्रसादत्रिपाठी)**

भगवत्याः परमुपासकानां प्रो.भवेन्द्रझामहोदयानां गोलोकगमनस्य वार्ता श्रुत्वा अनुभूयते यते सम्पूर्णसंस्कृतजगतः अपूरणीया एषा क्षति जाता। ईश्वरः तेषां आत्मानं शान्ति प्रयच्छेत्।

**(प्रो,शीतलाप्रसादशुक्लः, नवदेहली)**

प्रो.भवेन्द्रझामहोदयानां महाप्रयाणं संस्कृतजगतः अपूरणीया क्षतिः वर्तते। **(प्रो.सुन्दरनारायणझा)**

राष्ट्रपतिना सम्मानिताः प्रो.भवेन्द्रझावर्याणां अद्भुत् व्यक्तित्वमासीत्। ते अत्यन्तं मृदुभाषिणः प्रतिभाशालिनः मनीषिणः आसन्। प्रो. भवेन्द्रझामहोदयानाम् गमनं सर्वेषां कृते कष्टदायकं वर्तते।

**(श्रीवेदप्रकाशशर्मा, सम्पादकः- संस्कृतसंवादः, दिल्ली)**

सतीर्थ्यविदुषां मनस्वीनांप्रो.भवेन्द्रझामहोदयानां देहावसानस्य वार्ता श्रुत्वा शोकसंतप्तोस्मि। साश्रुपूर्णविनम्रश्रद्धाञ्जलि समर्पयामि।

**(प्रो.अर्कनाथचौधरी मिथिला)**

श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयस्य प्रो. देवेन्द्रप्रसादमिश्रमहोदयाः सूचितवन्तः यत् उदारचरितैः प्रो.भवेन्द्रझामहोदयैः सह नैरन्तर्येण अस्माकं चर्चा भवति स्म। तेषां सविधे गमने सति अलौकिकशान्तेः सुखस्य चानुभूतिः भवति स्म। तैः सह मेलनेन अनुभूयते स्म यत् वैदिकसनातनपरम्परायाः महानतम-ऋषिभिः मेलनं जायते। ब्रह्मलीनाः प्रो.भवेन्द्रझामहोदयाः सनातनधर्मेण, संस्कृतेश्च रक्षणार्थं सदैव प्रयत्नशीलाः आसन्। प्रतिदिनं ब्रह्ममुहूर्ते उत्थाय नैमित्तिककर्मणः सम्पादनं कृत्व प्रत्यहं दुर्गासप्तशतेः पाठः रुद्राभिषेकः, होमश्च तेषां दिनचर्या आसीत्। तेषां जीवनं मानवतायाः कृते समर्पितमासीत। प्रो.भवेन्द्रझामहोदयानां बहुधा कथनं भवति स्म यत् -वेदा हि यज्ञार्थमभिप्रवृत्ताः ख्र अर्थात् ऋग्यजुसामाथर्वादयः वेदाः सर्वदा यज्ञार्थं प्रवर्तयन्ति एतदर्थं त्रैवर्णिकैः वैदिकविधिना यज्ञादेः अनुष्ठानं कर्तव्यम्। तेषामेतदपि वचनमासीत् यत् मनुष्याणां जन्मनः सार्थकता परमार्थेन भवति। अतः दीनानां सेवा अपि देवकार्यमेव वर्तते। परममनीषिणां प्रो. भवेन्द्रझामहोदयानां देहावसानेन मिथिला-देहली-विन्ध्याटवेः जनाः शोकसंतप्ताः दुःखिताश्च सन्ति।

विक्रमाब्दे २०८१ फाल्गुनपूर्णिमायाः पावनपर्वणि देशस्य विश्वविश्रुतविदुषां प्रो.भवेन्द्रझामहोदयानां देहावसानेन सम्पूर्णसंस्कृतजगतः जनमानसः शोकसतप्तः वर्तते। विभिन्नेषु स्थानेषु शताधिविद्वांसः विदुषयश्च ब्रह्मलीन-प्रो.भवेन्द्रझामहोदयानां कृते श्रद्धाकुसुमाञ्जलयः समर्पयन्तः सन्ति, दिवङ्गतात्मनः शान्त्यर्थं शिवसायुज्यार्थं यज्ञनारायणं प्रार्थयन्तः सन्ति।

# भारतीय-ध्वनिशास्त्रे स्वरभक्तिविमर्शः

**-प्रोफेसर श्रीकृष्णः शर्मा**
पूर्व-निदेशकः
संस्कृत-प्राच्यविद्या संस्थानम्
कुरुक्षेत्र- विश्वविद्यालय
कुरुक्षेत्रम् (भारतम्)

वेदमन्त्राणां शुद्धोच्चारणेन, अर्थावबोधेन, पदस्वरूपसंरक्षणेन, यथाविधि विनियोगेन च वेदरक्षार्थं यथासमयं प्राचीनैराचार्यैर्विरचितेषु शिक्षा-व्याकरण-निरुक्त-छन्दो-ज्योतिष-कल्पाभिधानेषु षट्सु वेदाङ्गेषु ध्वनिविज्ञान-परायणं शिक्षानामकं वेदाङ्गं महनीयं स्थानं बिभर्ति । यद्यपि श्मुखं व्याकरणं स्मृतम्श इति प्रतिपादयता शिक्षाकारेण व्याकरणशास्त्रस्य महत्त्वं महता कण्ठरवेण उद्घोषितम्, किन्तु शिक्षाशास्त्रं व्याकरणशास्त्रस्य अनुशीलने प्रथमं सोपानं विद्यते।[1] यतो हि वर्णोच्चारण-प्रशिक्षणाभावे वर्णोच्चारणवैकल्याद् व्याकरणशास्त्रमपि बधिरकल्पायते । अथ च, वेदपुरुषस्य नासिकास्थानीयं शिक्षाशास्त्रं मुखस्थानीयस्य व्याकरणशास्त्रस्य सौन्दर्याधायकं कथयितुं शक्यते, यतो हि मानवीय मुखस्य सौन्दर्यनिर्धारणे नासिकाया महती भूमिका वर्तत इति पांसुलपादस्य हालिकस्यापि तिरोहितं नास्ति ।

शिक्षाशब्दस्य अर्थः

शिक्षाशब्दो विद्योपादानार्थकात् ण्यन्तात् शशिक्षश धातोर्निष्पद्यते । शशिक्षयति इति शिक्षाश इति व्युत्पत्तिलभ्यमर्थमाश्रित्य शिक्षाशब्दः पूर्णतया यौगिकः सन्नपि वर्णोच्चारणशिक्षणप्रदायके शास्त्रविशेषे रूढः सञ्जातः[2] । यदाह भाष्यकार आचार्यः सायण ऋग्वेदभाष्य- भूमिकायाम्- "वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा[3] इति । शिक्षाग्रन्थेषु शब्दोत्पत्ति-वर्णोच्चारण- वर्णविभागोच्चारणस्थान- प्रयत्न- प्रभृतीनां ध्वनिशास्त्रीयविषयाणां निरूपणं कुर्वद्भिः शिक्षाशास्त्रिभिः प्रदर्शिताः स्वरभक्ति - तत्स्थितिस्वरूपोच्चारणविषयका नैके प्रसङ्गाः सुतरां रुचिकराः प्रतीयन्ते । प्रातिशाख्येषु शिक्षाग्रन्थेषु च समुपलब्धान् एतान् ध्वन्यात्मकप्रसङ्गान् आधृत्य स्वर - भक्तिविश्लेषणमेव प्रस्तुतस्य शोधपत्रस्य प्रतिपाद्यो विषयो वर्तते ।

स्वरभक्तेः स्वरूपम्

स्वरभक्तिरिति अन्वर्थक पारिभाषिकं पदं विद्यते । भवति चात्र विग्रहः श्स्वरस्य भक्तिः आश्रयणम्श इति स्वरभक्तिः । विशिष्टदशायां वर्णोच्चारण-सौकर्याय कस्यचिद् विशिष्ट स्वरस्य आश्रय एव स्वरभक्तिपदवाच्यो भवति । सोऽयम् आश्रितः स्वरः कस्यां दशायां प्रयोजनीयो भवति, अस्य स्वरूपम् उच्चारणं वा कीदृक् स्याद्-इत्यत्र ध्वनिशास्त्रिभिर्बहुविचारितं स्वस्वमनीषया ।

ऋग्वेदप्रातिशाख्य आचार्यः शौनकः स्वरपूर्वकात् व्यञ्जनपरकाद् रेफात् परे ऋकाररूपां स्वरभक्तिमुपदिशति[4] । तत्र उवटकृतव्याख्यानाद् इदमधिकं विज्ञायते यद् ऋकारलृकारवर्णयोर्मिथः सावर्ण्याद् ऋकाररूपास्वरभक्तिवद् लृकाररूपा स्वरभक्तिरपि फलति[5]। एवं श्यदद्य कर्हि कर्हिचत्' (ऋग्, 8.73.5) इत्यादिषु स्थलेषु 'कर्हि' इत्यस्य उच्चारणं 'कर् ऋ हि' इत्येवं भवति तथा 'अर्चन्त्यर्कमर्किणः' (ऋग् 1.10.1)इत्यत्र 'अर् ऋ चन्त्यर् ऋ कमर् ऋ किणः' इत्येवं भवति। किन्तु 'आष्ट्रयाम्' (ऋग 10.165.3) इत्यत्र रेफस्य स्वरपूर्वकत्वाभावाद् अथ च 'सुरूपकृलुम्' (ऋग् 1.4.1) इत्यत्र रेफस्य व्यञ्जनपरकत्वाभावाद् स्वरभक्तिर्नैव प्रयुज्यते। शौनकमते तु स्वरपूर्वकाद् रेफात् (लकाराच्च) परे सर्वेष्वपि व्यञ्जनवर्णेषु सत्सु स्वरभक्तिः प्रयुज्यत एव, किन्तु कतिपयेऽनुदारवादिन आचार्या अत्र प्रबलं[6] विवदन्ते । ततश्च प्रातिशाख्येषु शिक्षाग्रन्थेषु च स्वभक्तेर्विषयो रेफाद (लकाराच्च) परे सत्सु ऊष्मवर्णेषु एव नियम्यते। सम्भवतः शौनकोऽपि एतत् नियमनं मौनेन स्वीकरोति।

ऋग्वेदप्रातिशाख्यस्य प्रसङ्गेन इदं विज्ञायते यद् आचार्यः शौनकः स्वरभक्तेर्द्वैविध्यम् अभिप्रैति-दीर्घा स्वरभक्तिश्चेति। रेफाद् (लकाराद्वा) ऊष्मवर्णस्य सामान्ये संयोगे सति दीर्घा स्वरभक्तिः कथ्यते[7], रेफाद् (लकाराद्वा) द्विरुक्तस्य ऊष्मवर्णस्य संयोगे सति ह्रस्वा चेति व्यवस्था[8]। दीर्घस्वरभक्तेरुच्चारणकालोऽर्धमात्रासदृशः, ह्रस्वस्वरभक्तेश्च उच्चारणकालश्च चतुर्थांश मात्रातुल्य इति भेदः।[9] पश्चाच्च नैकेषाम् आचार्याणां[10] मते द्विरुक्तोष्मवर्णसंयोगे स्वरभक्तिर्विरोधदर्शनात् परवर्तिनो ध्वनिशास्त्रिणो रेफाद् (लकाराद्वा) केवलम् असंयुक्तोष्मवर्णसंयोग एव स्वरभक्तिप्रसङ्गमनुमोदिरे।

तैत्तिरीयप्रातिशाख्ये स्वरभक्तेः क्षेत्रं पर्याप्तं संकुचितमुपलभ्यते। तदनुसृत्य रेफस्य (लकारस्य च) ऊष्मवर्णेन संयोगे सति रेफसदृशी (स्थानप्रयत्नदृशा रेफतुल्या ऋकाररूपा इत्यर्थः) स्वरभक्तिर्विधीयते।[11] ऋकाररेफयोः स्थानकरणसाम्यदर्शनाद् रेफप्रयोग ऋकारे पर्यवसीयते । तत्र ऋकाररूपा स्वरभक्तिर्भवतीति तत्त्वम्[12]

शुक्लयजुःप्रातिशाख्ये कात्यायनस्तु रेफात् लकाराच्च स्वरपरक ऊष्मवर्णे सति यथासंख्यम् ऋकारम् लृकारं च स्वरभक्तिमाह।[13]

अथर्ववेदप्रातिशाख्ये रेफात् परे स्वरपरक ऊष्णवर्णेऽकारस्य अर्द्धभागेन सदृशी स्वरभक्तिर्विधीयते । वर्षीयस्, वर्ष :- इत्यादीनि सन्ति निदर्शनानि[14]। वर् अ/2 षीः, वर् अ / 2र्षः इति व्यासः ।

याज्ञवल्क्यशिक्षायां स्वरभक्तेः स्थितिः स्वरूपं च विशदतया निरूपिते स्तः । तथा च तत्र पाठः-

रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरोदयाः ।
स्वरभक्तिरसा ज्ञेया पूर्वमाक्रम्य पठ्यते ।।
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत्।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ।। २.१७-१८

केशवीशिक्षायां स्वरभक्तिविषयकं प्रतिपादनमेवमुपलभ्यते-

'अहल्शल्पूर्ध्वरेफस्य सैकारः प्राक् च।' पद्यक्रमांकः 4

अत्रायमाशयो यत् अहल्परके (अर्थात् स्वरपरके) शलि ( परे सति ) ऊर्ध्वगामी रेफ एकार-सहित उच्चारणीय इति। अत्र व्याख्याने सवर्णसंज्ञकत्वात् रेफे वक्तव्ये लकारोऽपि ग्राह्य इत्यधिकं ज्ञेयम्। एतदनुसृत्य स्वरभक्तिमाश्रित्य 'दर्शतम् झ दरेशतम्, पर्शव्येन झ परेशव्येन, शतवल्शः झ शतवलेशः, वार्षीत झ वारेषीत्' इत्येवमुच्चारणीयं भवति ।

लघुमाध्यन्दिनशिक्षा[15] स्वरभक्तिशिक्षा[16] च केशवीशिक्षासम्मतं वर्णनमेवानुसरतः । वर्णरत्नदीपिकाशिक्षायां रेफाद् लकाराद्वा स्वरपरके ऊष्मवर्णे स्वरभक्तिसमाश्रयेण रेरूपं लेरूपं वा उच्चारणमुपदिश्यते। तत्र एकारः स्वरभक्तिरिति तत्त्वम्[17]।

नारदीयशिक्षायां तु प्रकृतदशायाम् ऋकाररूपा स्वरभक्तिः शिष्टा मन्यते, इकाररूपा उकाररूपा वा स्वरभक्तिः सर्वथा निषिध्यते[18]।

उपरिप्रदर्शितेन विवरणेनेदं निष्कृष्यते यद् अन्तस्थवर्णान्तःपातिनो रेफाद् लकाराद् वा परे प्रबलवायुप्रहारेण निष्पन्नानाम्, कष्मवर्णानां सन्निधिना सम्पद्यमानं संयुक्तवर्णानां कठिनम् उच्चारणं सरलीकर्तुमेव मुखासुखार्थं कस्यचित् स्वल्पस्य स्वरस्य आश्रयणं स्वरभक्तिरित्युच्यते। तथाभूतः समाश्रितः स्वरः कण्ठ्यः, मूर्धन्यः कण्ठतालव्यो वा स्याद् इत्यत्र भारतीया ध्वनिशास्त्रिणो यथामतं विवदन्ते। अयं मतभेदो वैदिकशाखागतम् उच्चारणवैशिष्ट्यमवलम्बते अथवा क्षेत्रीयमुच्चारणवैशिष्ट्यमेव हेतुष्टयनशास्त्री नानाप्रकारकाणां स्वरभक्तीनामुल्लेखेन इदं तथ्यं स्फुरति यत् तत्र तत्र प्रयुज्यमानासु उपभाषासु नानाविधाः स्वराः। प्रयुज्यन्ते स्म । ततश्च शिक्षाग्रन्थेषु कतिपयस्वराणां स्वरभक्तिरूपे प्रयोगदर्शनाद् इदं निश्चीयते यत् प्राचीनाः शिक्षाशास्त्रिणः स्वरभक्तेः परिनिष्ठितरूपं निर्धारयितुम् इच्छन्ति स्म, किन्तु स्वरभक्तेः परिनिष्ठतरूपनिर्धारण दुष्करम् एवं फलितम्, तंत्र मतभेददर्शनात्[19] । पूर्वप्रदर्शितेषु संयुक्तवर्णस्थलेषु प्रयुज्यमाना स्वरभक्तिरत्यल्पस्वररूप एवं उच्चार्यते स्म । ध्वनिशास्त्रिण एनां स्वरभक्तिं प्रायः कण्ठतालव्याम् एव स्वीचक्रुः।

स्वरभक्तर्भेदाः

रेफात् लकाराच्च चतुर्णां श-ष-स-ह वर्णानां संयोगे सति अष्टविध ा स्वरभक्तिः फलिता भवति । किन्तु रेफात् परे दन्त्यसकारस्य पत्वे सति अथ च सहितासु लकारात् परं मूर्धन्यषकारस्य दन्त्यसकारस्य च प्रयोगानुपलब्धेः सर्वमाहत्व त्र्यो भेदा हीयन्ते। एवं पञ्चप्रकारैव स्वरभक्तिरिति प्राप्यते । याज्ञवल्क्यशिक्षायामेताः पञ्च स्वरभक्तय एवमुपदिश्यन्ते-

करिणी कुर्विणी चौव हरिणी हरिता तथा ।
तद्वद् हंसपदा ज्ञेयाः पञ्चौताः स्वरभक्तयः ।।
हरिणी रशयोर्योगे हरिता लशकारयोः ।।
करिणी रहयोर्योगे कुर्विणी लहकारयोः ।
या तु हंसपदा नाम सा तु रेफषकारयोः ।।
याज्ञ० १२.१३-१५

स्वरभक्तिशिक्षायामपि (36-40 ) तथाविधमेव नामकरणं सोदाहरणं यथातथं प्राप्यते ।

वर्णध्वनिषु स्वरभक्तेः स्थानम्

अत्रेयं समुत्पद्यते यद् स्वरभक्तिः स्वरेषु परिगणनीया उताहो व्यञ्जनेपुर अत्र शौनकस्य श्न इति कथन महत्त्वपूर्ण वर्तत। अत्रायमायो यत् स्वरभक्तिप्रयोगे सति संयोगे संयुक्तस्थले न किमपि हीयते, अथ च तत्र संयोगजन्यानि कार्याणि यथावत् प्रवर्तन्ते। अनेनेदं ध्वन्यते यद् आचार्यः शौनकः स्वरभक्ति प्रायः स्वरेष्वेव परिगणयति यतो हि तत्प्रयोगे संयोगस्य स्वरूप विकृतं नैव सम्पद्यते। श्स्वरभक्ति रिति नामकरणमपि एतदेवसमर्थयति यद् अस्याः परिगणनं स्वरेष्वेव कर्तव्यमिति। शौनकस्य श्स्वरभक्तिः पूर्वभाग अक्षराङ्गम्श इति कथनं स्वरभक्तेः स्थिति पर्याप्तं विशदयति । अस्य कथनस्यायमाशयो यत् स्वरभक्तिः पूर्ववर्तिना रेफेण लकारेण वा सम्बद्धा भवति तद्गतस्य अक्षरस्य (स्वरस्य) अगं च भवति सूत्रमेतद् उवट एवं व्याचष्टे- "पूर्व रेफ लकार वा भजते, रेफादा लकाराद्वा यस्माद् व्यञ्जनाद उत्तरा भवति तत्सहिता पूर्वस्य स्वरस्याङ्ग भवतीत्यर्थः।"

आचार्यः शौनक एकेषाम् आचार्याणाम् मतमुपन्यस्यति[20] यत् स्वरभक्तिः पूर्ववर्तिना स्वरेण अथ च उत्तरवर्तिना स्वरेण साम्यं भजते। तदनुसृत्य 'धूर्षदम्' (ऋग् १.१४३.७) इति पदं 'धूरूषदम्' तथा च 'बर्हिषदः' (ऋग् 9.68.1) इति पदं बरिहिषदः' इत्येवमुच्चारणीयम् भवति। अत्रायं निर्गलितोऽर्थो यत् स्वरभक्तिरत्यल्पस्वररूपा भवति या पूर्वोत्तरयोरुभयोरपि अङ्गं भवति। अत्रेदं महत्त्वपूर्ण कथनं वर्तते यत् स्वरभक्तिप्रयोगे संयोगो नैव विहन्यते।

निष्कर्षः

स्वरभक्तेः स्थितिं क्षेत्रम् उच्चारणादिकं चाधृत्य प्रकृते विश्लेषणे योऽपि निष्कर्णः प्राप्यते तत्र नैकाः शङ्का अपि आपतन्ति यासां समाधानं दुष्करमिव प्रतीयते। तथा हि, अन्तरस्थरेफसहिते वर्णसंयोगे जायमानम् उच्चारणकाठिन्यमपनेतुं सर्वैरपि ध्वनिशास्त्रिभिः ऐकमत्येन स्वरभक्तिरनुमोद्यते, किन्तु रेफाद्वा लकाराद्वा द्विरुक्तेषु ऊष्मवर्णेणु सत्सु 'वर्ष्यान्' (ऋग् 5.83.2), 'आर्ष्टिषेणः' (ऋग् 10.98.5) इत्यादिषु कठिनस्थलेषु आचार्य - शौनकेन उपदिष्टा स्वरभक्तिरपरैराचार्यैः कुतो निषिध्यते[21], एतादृशेषु संयुक्तस्थलेषु स्वरभक्तिर्नितरामिष्यते । एवमेव प्रातिशाख्येषु विहिता ऋकाररूपा लृकाररूपा वा स्वरभक्तिः शिक्षाग्रन्थानां काले प्रायः एकाररूपा कथमजायत? अपरञ्च, स्वरभक्तिसमूहस्य 'करिणी' इत्यादीनि नामानि चापि विचारणीयानि सन्ति । तासां नामकरणे को हेतुः इति हृदयम् । असंशयम्, स्वरभक्तिविषया एता जिज्ञासा गहनं चिन्तनमर्हन्ति। इदं तु सुनिश्चीयते यद् वर्णनिष्पत्तिगतक्रमिकप्रक्रिया, संहितानाम् उच्चारणविषयकं शाखागतं वैशिष्ट्यम्, प्रादेशिक भाषाणां स्थानीयः प्रभावः इत्येवंविधेषु हेतुष्वेव सर्वासां शङ्कानां समाधानमन्वेष्टव्यं सुधीभिरिति शम् ।

सन्दर्भः

1. मुण्डकोपनिषदि वेदांगग्रन्थेषु शिक्षा प्रथमस्थान उल्लिखिता दृश्यते । तथा हि तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषम् इति । मुण्डक, 1.1.5
2. द्र0 शिक्षा स्वरवर्णोपदेशकं शास्त्रम् । ऋग्वेदप्रातिशाख्ये, 1.4 वर्गद्वयवृत्तिः ।
3. ऋग्वेदभाष्यभूमिका, पृ० 109
4. रेफात् स्वरोपहिताद् व्यञ्जनोदयाद् ऋकारवर्णा स्वरभक्तिरुत्तरा । ऋग्वेदप्रातिशाख्ये, 1.32 उवटभाष्यम् ।
5. रेफादुत्तरा रेफसदृशी भवति लकारादुत्तरा लकारसदृशी भवति । ऋग्वेदप्रातिशाख्ये, 1.32 : उवटभाष्यम्।
6. सर्वत्रैके स्वरभक्तेरभावम्। ऋग्वेदप्रातिशाख्यम्, 6.50
7. द्राघीयसी तूष्मपरा। तत्रैव, 6.40
8. इतरा क्रमे । तत्रैव, 6.49
9. द्राघीयसी सार्धमात्रा। तत्रैव 1.33 : अर्धेनान्या । तत्रैव, 1.35
10. द्रष्टव्या टिप्पणी 6
11. रेफोष्मसंयोगे रेफस्वरभक्तिः। तैत्तिरीयप्रातिशाख्यम्, 21.15
12. योऽस्य रेफस्य समानकरणः स्वरः तद्भक्तिः स्यात्। ऋकारश्चास्य जिह्वाग्रकरणत्वेन रश्रुत्या च समानधर्मः। तैत्तिरीयप्रातिशाख्ये, 21.15 : त्रिभाष्यरत्नम्।
13. रलावृलृवर्णाभ्याभूष्मणि स्वरोदये सर्वत्र । शुक्लयजुःप्रातिशाख्यम् ।।4.17
14. रेफादूष्मणि स्वरपरे स्वरभक्तिरकारस्यार्धं चतुर्थमित्येके ।। अथर्ववेद-प्रातिशाख्यम्, 1.101
15. रेफो रेफत्वमाप्नोति शषहेषु परेषु च।
ददर्श वर्षोऽर्हाच्च संयोगे नैव कारयेत् ।।
वर्ष्म-वर्ष्यायान्तर्हृदा तत्र तावदुदाहृतिः ।
लकारोऽपि च सावर्ण्यादेकारसदृशो भवेत्।
शतबल्शा च बल्हा च तत्र तावदुदाहृतिः।। पद्यक्रमांकाः, 11-13 लघु. मा. शिक्षा
16. ऊष्मोर्ध्वरेफस्योच्चारः सैकारो हल्युतो न चेत्।।
शिक्षासंग्रहः, पृ. 144 स्वरभक्तिशिक्षा 18
17. स्वरभक्तिश्च पूर्वागं देवम्बर्हिरुदाहृतिः।
इकारे च तथोकारे च तां यत्नेन विवर्जयेत्।
रेफो वाथ लकारो वा यत्रोष्मणि स्वरोदये।
स्वरभक्तिर्भवेत्तत्र पूर्वमाक्रम्य पठ्यते ।।
ऊष्मणामुपरिस्थस्तु रेफो याति रेवर्णताम्।
रेफत्वं पुनरायाति यद्यूष्माणोऽन्यसंयुताः ।। वर्गरत्नप्रदीपिका, 52-54
18. शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदसन्धौ ।
इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ।।
स्वरभक्तिर्द्विविधा त्वृकारो रेफ एव च । । नारदीयशिक्षा, 2.6-7
19. द्र. सिद्धेश्वरवर्माः प्राचीनभारतीय वैयाकरणों के ध्वन्यात्मक विचारों का विवेचनात्मक अध्ययन, पृ. 156
20. पूर्वोत्तरस्वरसरूपतां च । ऋग्वेदप्रातिशाख्यम्, 6.53 अत्र उवटः श्पूर्वस्वररूपतां चोत्तरस्वरसरूपतां च स्वरभक्तेरेक आचार्या मन्यन्ते । न केवलम् ऋकाररूपा स्वरभक्तिर्भवतीत्यर्थः । 'धूर्षदम्' इत्यूकाररूपा स्वरभक्तिः। 'बर्हिषदः' इति इकाररूपा स्वरभक्तिः ।।
21. द्र. अक्रान्तोष्मप्रत्ययभावमेके । ऋग्वेदप्रातिशाख्यम्, 6.52 अत्र उवटः 'अक्रान्तः (अद्विरुक्तः) ऊष्मा प्रत्ययो यस्याः स्वरभक्तेस्तस्या भावमेके आचार्या मन्यन्ते । वर्षम्। कर्हि। अदर्शि। जल्हवः। अक्रान्त इति कस्मात् ? वर्ष्यान्। अदर्श्यायती । शोधपत्रमिदं थाईलैंडदेशे बैंकाकनगरे सिल्पाकोर्न विश्वविद्यालये 28.06.2015-2.7.2015 दिनांकेषु समायोजिते षोडशे विश्वसंस्कृत- सम्मेलने प्रस्तुतमासीत् ।

## प्रसिद्धा शक्तिपीठेषु काकटपुरमंगला


प्रो. बनमाली बिश्वालः

प्रसिद्धा शक्तिपीठेषु काकटपुरमंगला।
जगन्नाथस्य संस्कृत्या देवी सम्बद्ध्यते पुनः।।

मंगलाख्यपुरे ग्रामे दिव्या देवी प्रतिष्ठिता।
कालान्तरे सोपि ग्रामश्चान्यनाम्ना प्रसिद्ध्यति।।

प्राचीनद्यां च नौयात्रां कुर्वन्नासीत्तु नाविकः।
नदीमध्ये क्वचिन्नौका चावरुद्धा हठात् पुनः।।

नाविकः कारणं ज्ञातुं प्रायतत यथामति।
किन्तु स विफलो जातः किं तत्र कारणं भवेत्।।

आदेशश्चाभवद्रात्रौ नाविकस्य कृते महान्।
'मम मूर्तिं नदीगर्भे मज्जितां च समुद्धर'।।

ततो निमज्ज्य नद्यां च भक्तवरस्स नाविकः।
दिव्यां मूर्तिं च निष्कास्य स्थापयामास मन्दिरे।।

मंगलाख्यपुरे ग्रामे प्रतिष्ठिता च मंगला।
काकटपुरनाम्नैव स ग्रामः परिवर्तितः।।

प्राचीनद्यास्स्थले यस्मिन् मूर्तिरासीन्निमज्जिता।
तत्रैवालौकिकं तथ्यं समक्षं वै समागतम्।।

काको नद्याः जले कश्चित् न्यमज्जत कुतः स्वयम्।
किन्तु पुनस्ततः काकः हन्त न पुनरागतः।।

अवरुद्धो यतः काकः काकटपुर उच्यते।
एवं नाम प्रसिद्धं वै काकटपुरमंगला।।

प्रत्यक्षा मंगला देवी लोक-कल्याणकारिणी।
सर्वेषां मंगलं कृत्वा प्रसिद्धा सर्वमंगला।।

नवकलेवरे काले मंगलोस्ति सहायिका।
दारोरन्वेषणे देवी भवति मार्गदर्शिका।।

पर्वाणि च प्रसिद्धानि मंगलायाश्च कानिचित्।
झामुयात्रा प्रसिद्धोस्ति देवस्नानाख्य-पूर्णिमा।।

दुर्गापूजाश्च तास्सर्वाः पाल्यन्ते च यथाविधि।
उत्कलीयः प्रभावश्च सर्वविधिषु दृश्यते।।

विग्रहे च प्रभावोस्ति प्रभावोपि समर्चने।
प्रभावश्च प्रसादेषु दृश्यते चोत्कलस्य वै।।

## तिरुपतिपुराधीशं वेंकटेशं नमाम्यहम्

वेंकटेश्वरदेवस्य दर्शनं यत् सुदुर्लभम्।
क्रियाशीलस्य भाग्ये तद्दर्शनं सुलभायितम्।।
यस्मै कस्मै च भक्ताय दर्शनं दातुमिच्छति।
तस्मै दत्त्वा तथा बुद्धिं देवश्चोपकरोत्यपि।।
दर्शनं यदि कस्मैचिद् भगवता न दीयते।
तस्य तदस्ति दौर्भाग्यं देवस्तत्र न कारणम्।।
श्रीविष्णुर्वेंकटेशोस्ति लक्ष्मी पद्मावती मता।
भक्तास्सुरक्षिता लोके तयोरेव कृपावशात्।।
श्रीयन्त्रे यस्समारुढो भाति तिरुमलाचले।
तिरुपतिपुराधीशं वेंकटेशं नमाम्यहम्।।
स्वयम्भूरेव देवोयं भुक्तिमुक्तिप्रदायकः।
भक्ताभयप्रदो देवो भक्त्या च परितुष्यते।।
नगरे यत्र कुत्रापि दर्शनं तस्य लभ्यते।
क्वचित्तिलकरूपेण प्रतिकृतिश्च कुत्रचित्।।
यथा वै चक्रनेत्राभ्यां जगन्नाथश्च बुध्यते।
तथोर्ध्वपुण्ड्रकेणैव वेंकटेशस्य बोधनम्।।
शेषाद्रिवासिनं वन्दे नौमि श्रीवेंकटेश्वरम्।
तिरुमलाय्यधीशन्तं वन्दे श्रीजगदीश्वरम्।।
नित्यं महोत्सवस्तत्र शोभायात्रा प्रतिक्षणम्।
ब्रह्मोत्सवे च देवस्य विशिष्टं वै समर्चनम्।।
वन्दे शेषशयानन्तं शेषाचलविभूषणम्।
तं लोकरक्षकं वन्दे वेंकटाचलनायकम्।।

## होलिकाषट्कम्


डॉ श्रेयांश द्विवेदी
संस्थापक कुलपति

शस्यदा मन्त्रदा पुण्यदा होलिका,
मुक्तिदा भुक्तिदा शक्तिदा होलिका।
वार्षिकीयं परीक्षात्मिका होलिका,
आयशुल्कप्रदातुं दृढा होलिका।।

सप्तरंगप्रदा सात्विकी होलिका,
मस्तभङ्गप्रदा तामसी होलिका।
नूतनं शस्यदा राजसी होलिका,
पीतरक्तप्रदा सौख्यदा होलिका।।

माधवी माधवस्य स्वयं होलिका,
कल्पना कल्पनायाः शुभा होलिका।
शङ्करस्य शुभा भारती होलिका,
कालिदास्य काली सदा होलिका।।

वेदनिष्ठा चतुर्धात्मिका होलिका,
औपनिषदात्मिका राजते होलिका।
दर्शने दृष्टिदोपासना होलिका,
पाणिनीया विभक्तिप्रदा होलिका।।

व्याससृष्टा पुराणात्मिका होलिका,
भारते भाति गीतात्मिका होलिका।
आदिकाव्येस्ति सीतात्मिका होलिका।
शैत्यदानन्ददा सर्वदा होलिका।।

गोपिभिर्ग्वालबालैः सखीभिर्मुदा,
राधिकावासुदेवौ जलं मिश्रितम्।
होलिकायां क्षिपन्तौ सुवर्णं शुभम्,
चित्रितं वो मुखं रोचते सर्वदा।।

## महाकुम्भाष्टकम्!!!


-डॉ. अरविन्दकुमारतिवारी

अवागहं विलोक्य तीर्थराजकुम्भसर्जनम्।
समर्थ एव नास्ति कोऽपि कर्तुमस्य वर्णनम्।। १

समोदमागता विशालसङ्गमस्य चार्चनम्।
सबान्धवाः प्रकुर्वते सदैव लास्यनर्तनम्।। २

धरा प्रयागतीर्थराजसङ्गमस्य वर्तनम्।
विभाव्य मोदते मुहुः करोति नैव घूर्णनम्।। ३

पुरी सतां सदागमनेन पापतापमार्जनम्।
स्वयं करोति सङ्गमस्थिता स्वभक्तकर्षणम्।। ४

गिरास्य गातुमस्ति को महत्त्वशालि मर्षणम्।
चलन् मुदा करोत्यहो पथा न ना नृघर्षणम्।। ५

करोमि पूज्यवासुदेवदिव्यधामकीर्तनम्।
दिनद्वयं च यापितं श्रुतं मुदा शुभार्जनम्।। ६

प्रमाणिकापि मातुमस्ति नो क्षमा नृवर्द्धनम्।
अनन्तलोकहारि दिव्यकुम्भशब्दगर्जनम्।। ७

कविप्रियारविन्दचित्तमोहदोषदर्पणम्।
कुचक्रमोक्षणं विधाय सन्तनोति तर्पणम्।।। ८

### पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

## ईश्वरमुखेन विश्वार्थम् ऐक्यसन्देशः

-डॉ. वासुदेव वि. पाठकः 'वागर्थः'
374, सरस्वती नगर, आंबावाड़ी, अहमदाबाद-15

सत्यं यत्परमं सदात्मनिरतैः भद्रं यहोवात्मकम्
अर्हन्-बुद्धमयं शिवं मुनिवरैः नित्यम् अहुर्मज्द वा ।
सत्नामेति च राध्यते सुमनसा अल्ला च ताओ च तत्
विश्वैक्यं विदधाति सर्वमजनुजाः जीवन्तु वैरं विना ।।१।।

अहिंसा धर्मस्य प्रथम-परमा येन गणिता
जनानां कल्याणं नियतमनसा येन भणितम् ।
स एवाहं अर्हन् प्रमुदिततया वन्दितवरः
महावीरो वीरः सकलगुणदोषादिरहितः ।।२।।

सुखोपभोगेषु विरक्तभावम्
धृत्वा मुदा काङ्क्षितो मोक्षमार्गः।
दयैव भूतेषु क्षमापरत्वम्
बुद्धत्वभावेन मयोपदिष्टम् ।।३।।

दिव्ये लोके वसन्तं मां कल्पयन्तीह केचन
प्रीत्यात्मकं मदीयं ते दिशन्ति कार्यमन्वहम्।
ते चौवेशुसमाः पुत्राः ममैव कार्यसाधकाः
सेवन्ते मां परात्मानं सर्वजीवेष्ववस्थितम् ।।४।।

मजदारूपतश्चाद्यं मां सर्वतत्त्वमूलतः ।
आतशं मुख्यतो ध्यायन् ध्यायन्ति मूलतो हि माम् ।
सर्वदा पारसीकास्ते जरथुष्ट्रादिनोदिताः ।
ध्यायन्त्येकेश्वरं पुण्यं शुभं कुर्वन्ति यद्धितम् ।।५।।

रबः रहीमश्चाल्लाहं रहमानादिनामभिः
तौकीदत्वेन पूज्योऽहम् इस्लामे भावपूर्वकम्।
संगे असवदश्चाहं प्रतीकत्वेन जानथ
तथा अलअमीनश्च पैगंबरो महंमदः ।।६।।

एकेश्वरस्य नामानि विविधानि विचारकैः
विचारितान्यथापेक्षां जनानां हितकाम्यया ।।७अ।।

अर्हन्- बुद्धेशनामानि यहोवा रहिमश्शिवः ।
रामः कृष्णः अहुर्मन्दः एकत्वं नामभेदतः ।।७ब।।

माता धाता पिता भ्राता सर्वं तस्यैव रूपतः ।
अमृतस्यैकदेवस्य बालाः प्रीत्या सुखं शिवम् ।।७स।।

संसारे विलसत्येव पितुरेकस्य संततिः
साम्मनस्येन भ्रातघ्णां निर्व्याजा धर्मधारणा ।।८।।

आधारत्वेन धर्माणां स्मर्तव्यः परमेश्वरः ।
विस्मर्तव्यं तु वैरित्वं, भ्रातृभावेन जीवनम्।।९।



# मरणादेशः

**मूल-ओडिया-कथाकारः-अजयमहापात्रः**

**अनुसर्जकः- नारायणदाशः**

मुन्नारेङ्गिः इति नाम। सर्वे आह्वयन्ति मुना भ्राता इति । सुनेवेडा-महाविद्यालये अनुतीर्णतायां विशिष्टं स्थानं प्राप्य अधुना प्रायः सप्तवर्षाणि राजत्वं चालयति सः, तस्मिन्नेव महाविद्यालये। महाविद्यालयस्य चतुष्पथे, जल्पनगोष्ठीषु वीथ्युपवीथिषु सर्वत्र तस्य स्थानम्। दुष्टच्छात्राणाम् एकं दलं नीत्वा कन्याः उद्दिश्य टिप्पणीकरणम् एव तस्य दैनन्दिनं कार्यम्। न केवलं मद्यालये उपाहारालये वा, अपि तु श्रेणीकक्षेऽपि मद्यपानं तस्य आधुनिकी शैली। महाविद्यालयच्छात्रेभ्य आरभ्य प्राचार्यपर्यन्तं तस्य रक्तनयने वीक्ष्य सर्वे तूष्णीं तिष्ठन्ति, यतो हि स कुख्यातस्य माओनेतुः शिवारेङ्गेः पुत्रः । शिवारेङ्गिः तु स्वल्पदिनेभ्यः पूर्वं धाराप्रवाह-विस्फोरणेन शताधिकजनान् मारितवान्। परन्तु प्रमाणाभावाद् इदानीं कारागाराद् बहिः स पुनः एकस्याः माओलीलायाः योजनां करोति।

शिवारेङ्गिः हिंस्रः पशुरिव। मनुष्यरक्तेन होलिकापालनं तस्य इच्छा व्यापारश्च । अनेन व्यवसायेन स कोटिशः रूप्यकाणि अर्जयति। सः अनैतिकः अर्थ एव अनर्थीकरोति तस्य पुत्रं मुन्नारेङ्गिम्। मनुष्याद् अमनुष्यो भूत्वा स सम्प्रति दुष्टः आक्रमणकारी लम्पटः सम्पन्नः। सर्वाः कन्याः उपभोग्याः इति पण्यद्रव्याणीति वा चिन्तयति सः। तस्य इच्छा भवति चेद् उद्यानस्य सर्वाणि पुष्पाणि स चित्वा आघ्राय अवकरकण्डोले क्षेप्स्यति। सहसा एकस्य पुष्पस्य सौन्दर्यं सुवासश्च तस्य उन्मादं प्रेम्णा विपरिणतम्। तत् पुष्पम् अपि जानाति परितः भ्रमन्ति नैके भ्रमराः। सा कदापि कम् अपि भ्रमरं वक्रनेत्रेण अपि न पश्यति अपि च चिन्तयति भ्रमराः सर्वे उन्मादाः सन्ति इति। तस्य पुष्पस्य कस्माद् अपि भयं नास्ति भीतिर्नास्ति। कारणं सा आसीत् आरक्षाधीक्षकस्य अशोकचौधुरि-महोदयस्य कन्या प्रियाचौधुरी । सुन्दर्याः प्रियायाः सौन्दर्यस्य इन्द्रजालं यथा अन्यान् विमोहयति ततोऽधिकं विमोहयति तस्य ओडिशीनृत्यम्। महाविद्यालयस्य उत्सवे प्रथमवारं तस्या ओडिशीनृत्यं दृष्ट्वा विमोहितो जातो मुन्नारेङ्गिः। तस्माद् दिनात् कन्याभ्यः टिप्पणीम् अत्यजत् सः। महाविद्यालये छात्रान् सावधानान् अकरोत् कोऽपि नेत्राणि स्फारीकृत्य तां द्रष्टुं नार्हति इति। तदर्थम् अनेकान् क्षतविक्षतान् रक्ताक्तान् च अकरोत्। तस्य मनसि हृदये च अधुना केवलं प्रिया। अधुना स शृणोति तथा अनुभवति तस्य हृदयस्य प्रतिस्पन्दनं प्रियायाः नुपूरशिञ्जिनीम् । एतत्तु सम्पूर्णतया एकपक्षीय प्रेम प्रेमिकः स उन्मादप्रेमी सम्पन्नः।

धारावाहिक-विस्फोरणस्य प्रमाणम् आरक्षिणां हस्ते लग्नम्। शिवारेङ्गिः बन्दीकृतो कारागारं प्रेषितः। व्यवहारः प्रचलितः। माओ-महालये उत्तेजना दृष्टा। स्थाने स्थाने विस्फोरणानि, आरक्षकालयेषु विस्फोरणानि, आरक्षक संवाददातृसन्देहेन हननानि, आत्मसमर्पणं कृतवतां माओ-सदस्यानां परिवारजनानां हननानि, तर्जनानि, आदेशात्मकपत्राणि च वर्द्धितानि, तथापि शिवारेङ्गिः न मुक्तः । सहसा तस्य सङ्केतेन आगते एकस्मिन् मृद्वर्णपिहितपत्रे दृष्टिः पतिता मुन्नारेङ्गेः। स पत्रम् उद्घाट्य अपश्यत्। लिखितमासीत्-प्रथमम् अपहरणम् । शिवारे मुक्ते: परं तस्मिन् कारागारात् प्रत्यागते मारणम्। शिवारेङ्गः पुनः तस्य पिता। मानसिकस्तरे माओवादिभिः समतुल्यतां गच्छन् स पिहितपत्राद् भावचित्र निष्कास्य अपश्यत् । आश्चर्यभावेन वारं वारम् अपश्यत् भावचित्रम्। क्रमशः स व्यग्रोऽभवत्। सर्वत्र दूरवाणीम् अकरोत्। ज्ञातवान् यत् एषा आरक्षाधीक्षकस्य अशोक चौधुरि-महोदयस्य कन्या प्रियाचौधुरी । यस्तस्य पितरं वन्दीकृत्य व्यवहारं प्रचालयति। तदर्थं तस्य पितुर्मरणादेशोऽपि भवेत्। अपरपक्षे प्रियाचौधुरी अधुना माओवादिनां लक्ष्यम् । किं करणीयम्? किं न करणीयम् इति तथा न ज्ञातम्। सम्पूर्णरात्री तनेत्रयोर्निद्रा नास्ति, कं जीवविष्यति के मारविष्यति? इति।

परस्मिन् दिवसे प्रातः प्रियाचौधुरी अपहृता इति संवादः सम्पूर्ण ओडिशाराज्ये चर्चितविषयोऽभवत। दूरदर्शनेषु प्रसारमाध्यमेषु संवादपत्रेषु सर्वत्र अयं प्रमुखसंवादः कोऽपि प्रियायाः संवादं न प्राप्तवान। शिवारेः मोचनाय माओवादिनः संवादं प्रेषितवन्तः । रक्तवाहिन्याः प्रचारपत्राणि सर्वत्र प्रसारितानि । आरक्षाधीक्षकस्य अशोकचौधुरिमहोदयस्य परिवारे खेलति शोकस्य च्छाया। तथापि स सम्पूर्णतया नीरवः आसीत् साधारणजनतायाः प्रसारमाध्यमस्य च समक्षम्।

प्रिया आत्मानम् आविष्कृतवती चतुर्दिक्षु घनारण्यपरिपूरितायां पर्वतपरिवेष्टितायाम् एकस्यां समतलभूमी एकस्मिन् चन्द्रातपाञ्चिते शिविरे । शिबिराद् बहिरागत्य अपश्यत, दूरे प्रवहते काचित् काकपेया नदी, नद्याः पार्श्वे एका सुन्दरी निर्झरिणी, सामान्यदूरे केचन हरिणा घास चरन्ति । नदीकूले नैके बका, गेण्डालिया पक्षिणच आहारान्वेषणे तत्पराः सन्ति । अतिचमत्कारः आसीत् प्रकृतेः मनोरमदृश्ये । परन्तु तन्मनोमध्ये स्थितं भयं जीवनस्य अनिश्चितत्वं च

तन्मनः हृदयश्च व्यचालयत। पुनः परितः दृष्टिपातं कृत्वा हृदय विदार्य चीत्कृतवती । तस्याः चीत्कारः शान्तपरिवेशं शब्दायितं कृत्वा तत्पार्श्वे पुनः प्रत्यागच्छत। न कोऽपि लाभो जातः । केवलं केचन पक्षिणः उड्डीनाः जाताः, हरिणाश्च सकृत् प्रियाम् अवलोक्य पुनः घासभक्षणे तल्लीना जाताः । प्रियाः पुनः परितः अवालोकयत, अरण्यान्तराले अपरशिविरस्य अर्द्धभागो दृश्यमानो जातः । तत्र निश्चयेन तस्याः शत्रवो वसन्ति । तथापि अस्याम् अरण्यान्यां तु कश्चन मानवः अपेक्षते एव शत्रुः भवतु भवतु वा मित्रम्। एकनिःश्वासेन सा अधावत् दीर्घश्वासैः सह। दीर्घश्वासव्याकुला सा तस्य पटवेश्मनः समीपं प्राप्य द्विधां विना सङ्कोचं विना द्वारे लम्बितं वखम् अर्द्धम् उद्घाटय अन्तः मस्तकं प्रवेश्य अपश्यत् । तस्याः समक्षं स्थितं मनुष्यं विलोक्य तस्याः नयने क्रमशः विस्फारिते। सा तस्याः नयनयोरपि विश्वासं कर्तुं न शक्ता । अन्तः प्रविश्य सा तं मनुष्यं दृष्टवती, तस्याः आश्चर्यस्य सीमा पारं गता । सा तस्य पादयोः साष्टाङ्गं लम्बभावेन पतिता, लघुः शिशुरिव भो भो स्वरेण क्रन्दितवती। कथन धीरो नम्रः शान्तश्च कण्ठस्वरोऽश्रूयत वत्से, अत्र क्रन्दनस्य अर्थो मूल्यहीनः अस्माकं हस्ते स्वल्पः समयः। अनेन सीमितसमयेन बहुकिमपि करणीयम् अस्ति। न केवलं तव कर्णयोरपि तु मम कर्णयोरपि प्रतिक्षणम् ए.के. फर्टिसेभेन गर्जति। तब अपहरणं तथा मम अपहरणं जातम्। परन्तु व्यवधान तु एतावन्मात्रं यत्तव अपहरणं माओवादिशिवारेङ्गिनिमित्तं मम अपहरणं तु तव कृते प्रियाचौधुरी विस्मिता सती पश्यन्ती स्थिता विश्वप्रसिद्धम् ओडिशिनृत्यगुरु केलुचरणमहापात्रम् गुरुः केलुचरणोऽवदत् संशयं दूरीकृत्य अकथयत। अहं जानामि त्वं मम श्रेष्ठशिष्यायाः सुप्रियापाठक इत्यस्याः कन्या प्रियाचौधुरी। तब मातुः रूपगुणान् सम्मान्य तब पिता आइ.पि.एस. अशोकचौधुरी पर्यणयत। परन्तु विवाहपरदिवसे एव बाल्यकालात् सुप्रियया तस्याः लघुलघुपादयोः बद्धं नुपूरं स उन्मोच्य अक्षिपत् । अज्ञापयत् यत् स कश्चन आरक्षाधिकारी, तस्य पत्नी नूपुरं बद्धा नर्तिष्यति चेत् तस्य अपमाननं भविष्यति। सुप्रियाया अन्तर्दाहम् अहम् अपश्यम् अनुभूतवान् तस्याः अन्तर्ज्वलनम्। तस्याः शिथिलेऽपि शरीरे मनः इदानीमपि स्वनैः सह नृत्यति तब अन्तः तस्याः कलाम् ईश्वर स्थापितवान् । त्वं तव पितुः अगोचरेण एकलव्य इव मम नृत्यानां दृश्यसान्द्रमुद्रिकां पश्यन्ती नृत्यम् अभ्यस्यसि। त्वया महाविद्यालयोत्सवे उक्तम् आसीत् खलु त्वम् ओडिशीनृत्ये जीवनादपि अधिकं स्निह्यसि, जीवने सकृद गुरोः केलुचरणमहापात्रस्य पादं स्प्रष्टुम् इच्छसि तथा मरणात् पूर्वम् एकवारम् अतिविशालमत्रे ओडिशाराज्यस्य उत्कृष्टकलारूपं नृत्यम् ओडिशीनृत्यं प्रदर्शयितुम् इच्छसि । वचनरहिता आसीत् प्रिया नेत्रयोः प्रवहते धारायाः परं धारा नेत्रजलस्य द्य सा विभावयितुमपि न शक्नोति एतत् कीदृशम् अपहरणम् गुरुः केलुचरणोऽवदत्- मया तव मातुः मुखात् किञ्चित् श्रुतमासीत्, अवशिष्टम् एतेभ्यो माओवादिभ्यः श्रुतम् प्रिया नेत्रयोजलं प्रमार्जयन्ती आत्मानं नियन्त्रयति स्म केलुचरणः शिबिराद् बहिः प्रियाम् आनीय परितः स्थितान् पर्वतान् प्रदर्श्य अकथयत्- अत्र केवलं मस्तकोपरि आकाशः, पादतले पृथिवी, चतुर्दिक्षु दूराद् दूरतरं यावत् परिव्याप्ताः सन्ति वनपर्वतनदीनिर्झराः । अरण्य हिंस्रजन्तुभिः पूर्णम्, ततोऽधिकाः हिंखाः सन्ति परितः स्थिताः शतसहस्रमाओवादिनः। श्वः सूर्योदयेन सह अस्माकं जीवनस्य अवशिष्टानां शतस्य दिनानां प्रथमदिनस्य आरम्भो भविष्यति। तेषां पणानुसारेण अहं मम जीवनस्य श्रेष्ठ-ओडिशिनृत्य शिक्षणं दास्यामि, त्वं तव जीवनस्य श्रेष्ठं नृत्यं प्रदर्शयिष्यसि । प्रतिदिनं नृत्यस्य अर्धहोरात्मिका दृश्यसान्द्रमुद्रिकां प्रस्तुत्य ते कस्मै एफ. टि. वि. दूरदर्शनवाहिन्यै दास्यन्ति । प्रतिदिनं साक्षात् दिवा द्वादशवादने प्रदर्शितं भविष्यति तत्। तन्मध्ये यदि शिवारेङ्गिः मुक्तो न भविष्यति तदा शततमे प्रदर्शने सम्पूर्ण विश्व तव अन्तिमनृत्येन सह मृत्योः ताण्डवलीलाम् अपि द्रक्ष्यति। मम जीवनं मृत्युर्वा तेषाम् एव हस्ते । यतो हि मम अपहरणस्य संवादः कस्यापि पार्श्वे नास्ति। सर्वे जानन्ति अहं मम लण्डनस्थिते वासभवने अस्मि इति ।

प्रियाचौधुरी तस्या जीवनस्य सर्वान् स्वप्रान् प्राप्तवती हस्तलभ्यतया यथा मरणादेशं प्राप्य वलिस्तम्भे लम्बितुं गच्छन् अपराधी अन्तिमेच्छां पूरयति। सा तस्याः गुरोः केलुचरणस्य नेत्रे निमील्य पुनः प्रत्यक्षीकृतवती स्वीयं मृत्युम्। पुनः नेत्रे निमील्य पुनः उद्घाट्य आत्मानं द्रष्टुं चेष्टितवती, सा केवलम् एकां नृत्यरतां नायिका द्रष्टुं शक्तवती। तद्दिनात् सा प्रतिमुहूर्त्तम् अर्पितवती नृत्यनिमित्तम्। दिनात् परं दिनं नृत्यप्रस्तुतिभागाः वर्द्धिताः, तस्याः नृत्यशैल्यामपि परिवर्तनं जातम्, सा अभवत् अत्यन्तनृत्यनिपुणा । गुरुः केलुचरणोऽपि तस्याः नृत्यस्य प्रशंसकोऽभवत्। पचाशता नृत्यप्रस्तुतिभागैः एवं सम्पूर्णे उत्कले कोलाहलो जातः। प्रियाचौधुरीनृत्यस्य प्रशंसा सर्वेषां मुखात् श्रूयते स्म। यद्दिने नवनवतितमो नृत्यप्रस्तुतिभागः प्रस्तुतः, तदा कश्चन मुखावरणधरो माओवादी स्कन्धे

भूशुण्डिं निधाय तस्यां सान्द्रमुद्रिकायाम् अवदत्- श्वः भवति नर्तक्याः प्रियायाः अन्तिमदिवसः । ओडिशिनृत्यान्ते गुलिकाभिः तस्याः हननस्य दृश्यच्चित्रं भवन्तः द्रष्टुं शक्नुवन्ति । साक्षात् दिवा द्वादशवादने अन्तिमं नृत्यप्रस्तुतिभागम्।

न केवलम् ओडिशायां न वा भारतदेशे अपि तु भारताद् बहिरपि तदा प्रिया ओडिशीनृत्यशिल्पिरूपेण परिचिता आसीत। ओडिशायाः पुरपल्लीषु ग्रामगञ्जेषु सर्वत्र सिक्थवर्तिकाशोभायात्रा अभवत्। सर्वे माओवादिभ्यः प्रियायाः जीवनम् अयाचन्त । पश्यत्सु एव सर्वेषु भारते विभिन्नस्थानेषु सिक्थवर्तिकाशोभायात्रा आयोजिता । समस्तदूरदर्शनवाहिनीषु प्रचलिताः तर्कवितर्काः आलोचनासभाश्च। सर्वे प्रियायाः मुक्तिम् इच्छन्ति स्म। सर्वकारस्य उपरि प्रणोदनम् आगतं, शिवारेढेः मोचनाय । किन्तु अशोकचौधुरी कठोरभावेन निराकृतवान। तस्य पार्श्वे आसीत् मुन्नारेङ्गेः पत्रम्। स नावगच्छति स्म, का इच्छा माओवादिनाम् इति । किं पुनः इच्छति अयं मुन्नारेङ्गिः?

समयः सरति, निकटीभवति प्रायोजितः कार्यक्रम इव साक्षात्समचे सान्द्रमुद्रिका आगता साक्षात् दिवा द्वादशवादने आरब्धं प्रियायाः ओडिशिनृत्यम् । प्रथमतः सा विश्वप्रसिद्धस्य ओडिशिनृत्यगुरोः केलुचरण महापात्रस्य समक्षम् उपविश्य पूजार्चनम् अकरोत्। साक्षात् स्वयं गुरु केलुचरणं दृष्ट्वा सर्वे आश्चर्यान्विताः । प्रिया अपि जानाति एतत् तस्या जीवनस्य अन्तिमदिनम् । सा सर्वेभ्यो विनम्रप्रणतिपुरस्सरं नृत्यं न्यवेदयत। तस्मिन् मुहूर्ते ओडिशायाः आबालवृद्धवनितानेत्राणि अश्रुपूरितानि जातानि सर्वे केवलम् ईश्वरं प्रार्थयन्ति स्म हे ईश्वर, त्वमेव सहायो भव। निरीहायाः प्रियाचौधुर्याः कृते जीवन देहि प्रिया तज्जीवनस्य श्रेष्ठाम् ओडिशी कला प्रदर्शयति स्म। एकदा पन्या सुप्रियापाठकवर्यायाः पादयोः नुपूरम् उन्मोच्य लघुलघुखण्डैः विभज्य क्षिप्तवान् अशोकचौधुरी अय पश्यन् अस्ति स्वकन्यायाः पदयोः नुपूरम्... वारं वारम् एकशतवारम्। तेन अवगतम् आसीत् नुपुरस्य महत्त्वम्। तेन ज्ञातमेव, कोऽपि इच्छति चेदवश्यं यन्त्रज्ञः, चिकित्सकः, भारतीयप्रशासनिकाधिकारी, नेता, मन्त्री, प्रधानमन्त्री वा भवितुं शक्नोति, न तु शिल्पी । यतो हि कला ईश्वरप्रदत्ता वर्तते । अधुना स विकलभावेन ईश्वरं प्रार्थयति- हे ईश्वर, मम जीवनविनिमयेन वा मम प्रियां मह्यं प्रत्यावर्तय।

साक्षात् सार्द्धद्वादशवादने प्रियाचौधुरी नृत्यं समापितवती । ततः परं झिलिझिलि भूत्वा दूरदर्शनानां जवनिकाः कृष्णवर्णीयाः अदृश्यन्त। ततः अश्रूयत भयङ्करभावेन विस्फोटनशब्दः। तदनु अगर्जन् भुशुण्डयः । सर्वे स्वल्पकालं यावत् निस्तब्धं स्थिताः। सर्वेषां मुखात् केवलम् अहो अहो, अये अये, चु... चु... शब्दाः निर्गताः । सर्वत्र शोकस्य च्छाया अखेलत्।

दिवसो निपतति। सूर्यः पश्चिमाकाशे निमज्जितः। सायं षड्वादनं स्यात् तदा दूरदर्शनजवनिकाशीर्षके आगतो मुनारेङ्गेः आत्मसमर्पण-संवादः। संवादानुसारेण स राजसाक्षी भविष्यति। ततः संवादः सम्प्राप्तः प्रियाचौधुरी गुरुः केलुचरणश्च सुरक्षितौ आस्ताम्। तदानीं प्रियायाः नैके प्रशंसकाः आसन्। सर्वत्र स्फोटकानि स्फोटितानि, प्रसरति आनन्दलहरी।

माओवादिभिः ज्ञातं- प्रियाप्रेम्णाबद्धो मुनारेङ्गिः विश्वासघातम् अकरोत्। तस्य पितुर्जीवनेनापि अखेलत्। ते आदौ तस्य सप्तसहयोगिनो निर्ममतया अघ्नन। ततः तेषां लक्ष्ये स्थितो मुनारेङ्गिः।

प्रियाचौधुरी तथा गुरुकेलुचरण इत्यनयोः साक्षात्काराः प्रसारिताः । प्रिया अवोचत्- मुनारेङ्गिः क इति अहं न जानामि। न कदापि अपश्यम्। महाविद्यालये नाम श्रुतम् आसीत्, सहचरीभिरुक्तम् आसीत् स कश्चन दुष्टजनः। गुण्डाजनः । गुरुदेवोऽवदत्- मम अरण्यवासकाले कश्चन युवको मुखावरणं धृत्वा साक्षात् सन्ध्यायाम् अवनतायाम् आगत्य मम शिबिरं परितः दौवारिक इव तिष्ठति स्म, यथा कोऽपि मूषकः तैलपो वा मम अस्थायिगृहं न प्रविशेत। पुनः प्रभातायां रात्रौ सिन्दूरिते आकाशे स क्व निर्गच्छति स्म कदापि कोऽपि नापश्यत् तम्। गुरुदेवः कथनम् अनुवृत्य अवदत्, आम्, तस्य नाम्ना स्थितां समग्रां सम्पत्तिं विक्रीय स ओडिशिनृत्यस्य प्रसारनिमित्तं कोटिद्वयपरिमितं धनं मम वित्तकोषसङ्ख्यायां सञ्चितवान्- गुरुदक्षिणारूपेण । सत्यं किमेवं भवेत् प्रेम इत्यहं मम जीवने प्रथमवारं जानामि ।

तद्दिने मुनारेडिः विचारलयगमनमार्गे माओवादिभिः विहितेन विस्फोरणेन नैके आरक्षका मृताः, अनेके च आहताः सन्ति। मुनारेङ्गिः अपि तेन विस्फोरणेन रक्ताक्तो जातः, परन्तु विचारालयं यावद् गन्तुं समर्थो जातः। सर्वे प्रतीक्षां कृतवन्तः राजसाक्षिणो मुनारेङ्गिः इत्यस्य कथनम्। स द्वन्द्वे आसीत्। एकतः आसीत् प्रिया, अधुना स जानाति एव प्रियायाः हृदये मुनारेङ्गिः वसतिं चक्रे इति परन्तु स स्वयं न इच्छति प्रियायाः नाम्ना सह कस्यापि दुष्टजनस्य नाम योजितं भवतु इति । अपरतः स्वीयो जन्मदाता पिता-स दुष्टो भवतु, अशिष्टो वा भवतु, गुण्डा भवतु वा वदमास्। सर्वान् चमत्कृत्य स स्वविवृतौ अवदत्- अहं मुनारेङ्गिः। अहं धारावाहिक-विस्फोरणेन शतसहस्रजनान् मारितवान। समस्त-माओ-कार्यक्रमाणां मुख्यनायकः अहम् एव। व्यवहारः प्रचलितः, शिवारेङ्गिः निर्दोष इति बन्धनमुक्तो जातः, मुनारेङ्गिः मरणादेशं प्राप्तवान्। प्रियाचौधुरी अनुरोधं कृतवती, परन्तु मुनारेङ्गिः तया साक्षात्कारं न कृतवान। जीवने एकवारमपि प्रिया मुन्ना-मुखं न अपश्यत् । मातुः सुप्रियापाठकवर्याया इव तस्या अपि नुपूरं खण्डं खण्डं भविष्यति इति भयेन विवाहं न कृतवती। अधुना षष्ट्युत्तरवयःक्रमे अपि तस्याः नुपूरशिञ्जितं श्रूयते, सम्पूर्ण विश्वं शृणोति कथयति च- एवमेव भविष्यति प्रेम....।

साभार-कथासरित्

# भाषाशास्त्रे भर्तृहरेः योगदानं अविस्मरणीयम् - प्रो. मल्हारः कुलकर्णी

नवदिल्ल्यां। भर्तृहरिणा विरचितं वाक्यपदीयम् इति एकं तीर्थक्षेत्रमिव अस्ति, यस्य माध्यमेन व्याकरणशास्त्रं ऐतिहासिकं शिखरं प्राप्तम्। भाषाशास्त्रे आचार्यभर्तृहरेः योगदानं सर्वथा अविस्मरणीयम्। एते विचाराः आईआईटी मुम्बई इत्यस्मिन मानविकी-सामाजिकविज्ञानविभागस्य आचार्येण प्रो. मल्हारेण कुलकर्णिना स्वस्य बीजवक्तव्ये उक्ताः। सः दिल्लीविश्वविद्यालयस्य संस्कृतविभागेन भारतीयदार्शनिकअनुसन्धानपरिषदः, भारतसरकारस्य शिक्षामन्त्रालयस्य आर्थिकसहाय्येन आयोज्यमानायां दशदिवसीय-राष्ट्रीयकार्यशालायाम् उद्घाटनसमारोहे एवमुक्तवान्।

सः अवदत् यत् अस्माकं कर्तव्यं अस्ति यत् एतां महानां ज्ञानपरम्पराम् अग्रे नेतुं सर्वे मिलित्वा कार्यं कुर्मः। भर्तृहरेः सर्वाधिकं योगदानं शब्द-अद्वैतवादे तथा शब्दब्रह्मतत्त्वे अस्ति।

विभागाध्यक्षस्य प्रो. ओमनाथः बिमली इत्यस्य वक्तव्यम्

विभागाध्यक्षः प्रो. ओमनाथः बिमली अवदत् यत् अद्य वयं सर्वे अत्र संजाताः पूर्वैः विद्वद्भिः स्थापितायाः ज्ञानपरम्परायाः चर्चायाः महत्त्वपूर्णस्य कर्तव्यस्य निर्वाहं कुर्मः। अस्य कार्यशालायाः माध्यमेन एषा ज्ञानधरोहरः भावी युवापीढ्याः निकटं प्राप्यते।

सः अपि अवदत् यत् भारतीयदर्शनं मूलतः आध्यात्मिकदर्शनमेव। भर्तृहरेः दर्शनं अपि भारतीयदर्शनस्य मूलभावनया सह सम्बद्धम्। वस्तुतः सर्वेषां दुःखानां मूलं संसारे अविद्यायां स्थितिः एव। अज्ञानं दुःखस्य कारणम्। अतः यदि सुखमिच्छामः, तर्हि अज्ञानं दूरं कर्तव्यम्। अस्मिन विषये आत्मनोऽवलोकनं आवश्यकम्।

कार्यक्रमस्य संयोजिकायाः प्रो. मीरा द्विवेदी इत्यस्याः मन्तव्यः

कार्यक्रमस्य संयोजिका प्रो. मीरा द्विवेदी अवदत् यत् शब्दस्य, वाक्यस्य, अर्थस्य च मूलतत्त्वानां चर्चायाः अवसरः अस्मिन कार्यशालायाम् लभ्यते। आचार्यभर्तृहरिणा विरचितं वाक्यपदीयम् इयं कार्यशाला शब्दज्ञानस्य आधारे आयोजिता। शब्दानां उपासना परमब्रह्ममहेश्वरस्य प्राप्तिं ददाति। अतः अद्यतनकाले शास्त्राणां गम्भीराध्ययनस्य आवश्यकता अत्यधिकम् अस्ति।

एषा कार्यशाला भारतीयसाहित्यस्य विचारधारायाः संवर्धने अपि सहायकं भविष्यति।

कार्यक्रमस्य शुभारम्भः वैदिकमन्त्राणां उच्चारणेन दीपप्रज्वलनेन च सम्पन्नः। कार्यशालायाः संयोजिकया



प्रो. मीरा द्विवेदी कार्यशालायाः संक्षिप्तविवरणं प्रदत्तम्, तथा संस्कृतविभागाध्यक्षः प्रो. ओमनाथः बिमली प्रस्तावनावक्तव्यं प्रदत्तवान्।

एषस्मिन् अवसरे प्रो. मल्हारः कुलकर्णिः बीजवक्तव्यं कृतवान्। विशिष्टातिथिरूपेण दिल्लीविश्वविद्यालयस्य कलासंकायाध्यक्षः प्रो. अमिताभः चक्रवर्ती उपस्थितः। अध्यक्षीयमुद्बोधनं प्रो. मिथिलेशः चतुर्वेदी अवदत्, तथा कार्यशालायाः सहसंयोजकः प्रो. रणजीतः बेहेरा धन्यवादज्ञापनं कृतवान्




## जगद्गुरुरामभद्राचार्यदिव्याङ्गराज्य- विश्वविद्यालयस्य चित्रकूटजनपदस्य माध्यमिकविद्यालयानां प्रधानाचार्याणां सम्मानसमारोहः एवं होलीमिलनसमारोहः आयोजितः

चित्रकूटः- अस्मिन्समारोहे मुख्यातिथिरूपेण जनपदविद्यालयनिरीक्षकः सन्तोषकुमारमिश्रः उपस्थितः आसीत्ए कार्यक्रमस्य अध्यक्षता च विश्वविद्यालयस्य कुलपतिना प्रोफेसरशिशिरकुमारपाण्डेयन कृता।



कार्यक्रमे भाषणं कुर्वन् कुलपतिः प्रोफेसरशिशिरकुमारपाण्डेयः उक्तवान् यत् विद्यालयाः एव विश्वविद्यालयस्य मूलाधारः भवन्ति। विद्यालयेषु पठन्तः छात्राः एव उच्चशिक्षायां प्रविशन्तिए अतः माध्यमिकविद्यालयात् एव छात्राणां मनसि प्रेरणा दातव्या यत् ते स्वीयायोग्यतानुसारं उचितं व्यावसायिकपाठ्यक्रमं वा अकादमिकपाठ्यक्रमं वा चान्यायां निकटवर्तिन्याम् उच्चशिक्षासंस्थायां प्रवेशं सुनिश्चितं कुर्वन्तु। एषः एव विश्वविद्यालयस्य प्रयासः यत् अधिकाधिकच्छात्राणां विश्वविद्यालये प्रवेशं सुनिश्चितं करिष्यतिए यथा ते विश्वविद्यालयस्य समावेशीवातावरणे अध्ययनं कृत्वा राष्ट्रनिर्माणे स्वीयं योगदानं दातुं शक्नुयुः।

सः अपि उक्तवान् यत् एषः विश्वविद्यालयः भारतस्य प्रथमः दिव्याङ्गविश्वविद्यालयः अस्तिए यत्र दिव्याङ्गाः सामान्याः च छात्राः राज्यसरकारेण प्रदत्तां अध्ययनसुविधां प्राप्नुवन्ति। प्रधानाचार्याणां सम्माननं गुरुशिष्यपरम्परायाः सम्माननं इति वर्णयन् सः उक्तवान् यत् कस्यापि विद्यालयस्य प्रधानाचार्यः तत्संस्थायाः प्रेरणास्रोतः भवति। नूनं प्रधानाचार्याणां भूमिका छात्राणां सर्वाङ्गीणविकासे अपरिहार्या अस्ति। तेषां नेतृत्वे नूतनसंततिः स्वीयं भविष्यं निर्माति। विश्वविद्यालयस्य विद्यालयैः सह सततसंपर्कस्य आवश्यकतां अपि सः विशदीकृतवान्।

मुख्यातिथिरूपेण उपस्थितः जनपदविद्यालयनिरीक्षकः आश्वासनं दत्तवान् यत् विश्वविद्यालयस्य प्रत्येकशैक्षिकप्रयासे प्रशासनिकसहयोगं सः सदैव प्रदास्यति। सः समस्तविश्वविद्यालयपरिवारं प्रधानाचार्यांश्च होलीपर्वणः शुभाशंसनं कृत्वा तेषां उज्ज्वलभविष्यस्य कामनां अकरोत्।

कार्यक्रमस्य समापनकाले धन्यवादज्ञापनं विश्वविद्यालयस्य कुलसचिवेन मधुरेन्द्रकुमारपर्वतेन कृतम्ए कार्यक्रमस्य संचालनं च सङ्गीतविभागाध्यक्षेण डॉ गोपालकुमारमिश्रेण कृतम्

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।